राजनीतिकचेतनया सह राष्ट्रियभित्तौ सांस्कृतिकजीवनमाधातुमपि प्रयत्नः कृतः । प्राचीनेतिहाससंस्कृतीनामध्ययने विशेषतोऽभिरुचिरुदपादि । तथा भारतीयविद्वद्भिः पाश्चात्यशिक्षाद्वारा गवेषणाया वैज्ञानिकपद्धतिमधिगम्य साहित्य–भाषा–धर्म–सामाजिकसंस्थानामध्ययनमकारि ।

अद्याप्यस्मिन् कार्ये यूरोपीयविद्वांसः सहयोगं ददति । किन्त्वत्र संशयो नास्ति, यस्त्वातन्त्र्यलाभोत्तरमस्माकमुत्तरदायित्वमधिकमैधिष्ट । अस्माकं कर्तव्यमस्ति यत्सार्वजनिकपद्धतावपि संस्कृतविद्याध्ययनाय वयं विशिष्टं स्थानं दद्याम । तथा गवेषणात्मककार्येषु प्रोत्साहनं दद्याम । आधुनिकयुगस्य महापुरुषद्वये प्रयुक्तः स्वप्राचीनसंस्कृतिप्रयुक्तश्च संसारेऽस्माकमादरो वर्त्तते । अयं खेदविषयः स्यात्, यदि वयमेतदावश्यककर्तव्यविषये नोचितमवदधीमहि, तथा संस्कृतवाङ्मयस्य रक्षणे वर्धने चौदासीन्यं दर्शयेम । संस्कृतवाङ्मयमादरगौरवास्पदं वस्तु वर्त्तते । तस्य विस्तरो गाम्भीर्यञ्चास्मांश्चकितयति । अस्माकं तदुचितगर्वेण भवितव्यम् । संस्कृतं जगतः सर्वप्राचीनार्यभाषा वर्त्तते । यस्य वाङ्मयमद्यापि विद्यमानमस्ति । ऋग्वेदोऽस्माकं सर्वप्राचीनग्रन्थोऽस्ति । रामायणं महाभारतञ्च जगतोऽनुपममद्वितीयञ्च काव्यमस्ति । इदमेवास्माकीनसंस्कृतेर्मूलभित्तिरूपमस्ति । अनेकेषां नाटकानां काव्यानाञ्च सामग्री एभिरेव ग्रन्थैरुपलब्धाऽभूत् । महाभारतं वेदवत्पवित्रं मन्यते । तदुक्तम् "इतिहासपुराणं पञ्चमं वेदानां वेदम्" । महाभारतमास्माकीनप्राचीनसंस्कृतिभाण्डागारभूतमस्ति । अस्मिन् प्राचीनाचारविचाराणां रीतिनीतीनामादर्शानां स्थानाञ्चेतिहास उपनिबद्धः । एतद्दर्पणतुल्यमस्ति, यत्र प्राचीनभारतजीवनं प्रतिबिम्बितं भवति । कलादृष्ट्या रामायणमुत्कृष्टग्रन्थो वर्तते । तस्माद्वाल्मीकिमादिकविमाचक्षते । अस्मिन्माधुर्यं प्रसादश्च गुणोऽस्ति । तथा इदमुत्तमकाव्यस्य प्रतिमानम्मन्यते । तस्मादेव रामायणमहाभारतयोरनेकं संस्करणमस्ति ।

रामोपाख्यानं यवद्वीप–बालिद्वीप–सुमात्रा–कम्बोडिया–चम्पा–श्याम–चीन–तिब्बतप्रदेशेषु प्रथितमासीत् । यवद्वीपसम्बन्धि रामायणस्य कियानंशः भट्टिकाव्यानुवादरूपेणास्ति । कियांश्चांशः तदनुसारमेवोल्लिखितोऽस्ति ।

तिब्बते यद्रामायणस्य संस्करणमुपलब्धमस्ति तस्य कथा रामायणकथातो भिन्ना वर्त्तते । जैनेष्वपि रामायणस्य संस्करणद्वयं वर्तते । एकं वाल्मीकिमनुसरति, द्वितीयबौद्धकथाप्रभावितमस्ति । इत्थमेव महाभारतकथापि केनापि केनापि रूपेण बृहत्तरभारतस्य कतिपयदेशेषु प्रचलिताऽऽसीत् । भारतीयभाषाभिस्तुलनात्मकभाषाविज्ञानं जनितम् । व्याकरणशास्त्रमप्यत्र देशे विकासस्य परां कष्ठामगमत् । श्चेरवात्स्कीसंज्ञकस्य रूसवास्तव्यस्य विदुषः शब्देषु पाणिनेरष्टाध्यायी मानवबुद्धेः सर्वश्रेष्ठकृतिष्वन्यतमा वर्त्तते । उपनिषदां विचारधारा साधना च संसारस्यालम्यरत्नेष्वन्यतमा वर्त्तते । भारते या विशिष्टधाराः समजनिषत, तासां सर्वासां मूलस्थानमुपनिषत्स्वस्ति । उपनिषद्वाक्येषु गाम्भीर्यं मौलिकत्वमुत्कर्षश्चोपलभ्यते । स च प्रशस्तैः पवित्रैरुदात्तैश्च भावैर्व्याप्तो वर्तते । मैक्समूलरस्य कथनमस्ति, यदुपनिषदः प्राभातिकप्रकाशेन पर्वतीयशुद्धपवनेन च समाना वर्त्तन्ते ।

यथा यदा पुण्यसलिला भगवती भागीरथी हिमानीत उद्गत्य पर्वतमालामुद्वेलन्ती प्रवहति । तदा तस्यां मज्जनाद्वाह्यमभ्यन्तरञ्च विशुध्यति । तथा क्षणमीदृशी प्रतीतिश्च भवति, यथाऽशेषवासनानां क्षयः सञ्जातः, समग्रञ्च शरीरं प्रीतिरसैराप्लुतं समस्तञ्च चित्तं कुशलचेतनाया भावनया वासितं व्याप्तञ्च भवति तथैवोपनिषद्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्यावगाहनेन नवीनं चैतन्यं नवीना प्रेरणा च लभ्यते नैतद्वाक्यं कदाचन पर्युषितं भवति, नापि कदाचन पुराणतामापद्यते किन्तु सदैव नूतनमेव तिष्ठति। उपनिषदस्ते स्तम्भाः सन्ति येषु प्रतिष्ठिताः संस्कृतविद्यानां भारतीयसंस्कृतीनाञ्च दीपाः सदा प्रकाशमादधते। अयमेवास्माकमचलनिधिरस्ति। अयमेवास्माकं जयस्तम्भोऽस्ति। संस्कृतवाङ्मयस्य व्यापकताप्यद्भुता वर्तते एतदन्तर्गतान्यनेकानि शास्त्राणि विद्याश्च वर्तन्ते। एतदीया धाराऽविच्छिन्ना वहति। संस्कृतवाङ्मये पालिप्राकृते अपि समावेशयामि। एकः समय आसीद्यदा संस्कृतस्य विशालक्षेत्रमासीत्। एशियाया मध्यभागादारभ्य दक्षिणपूर्वभागसम्बन्धिद्वीपपर्यन्तं संस्कृतस्याखण्डं राज्यमासीत्। तदा विविधसम्प्रदायसम्बन्धिनो विद्वांसः संस्कृत एव ग्रन्थान् रचयन्तिस्म तेषां शास्त्रार्थोऽपि संस्कृते भवतिस्म।

अस्मिन् विशालक्षेत्रे भारतीयसंस्कृतीनामपूर्वः प्रभाव आपतित आसीत्। यवद्वीपस्य प्राचीनं साहित्यं संस्कृताश्रितमासीत्। तथा श्याम—लङ्का—मलय—जावा—हिन्दचीन-प्रभृतिप्रदेशभाषासु संस्कृतप्रभावोऽद्यत्वेऽपि स्पष्टो वर्तते। अस्मिन्नेव काले भारतीयैरेषु द्वीपेष्वौपनिवेशिकमाधिपत्यं स्थापितमासीत्। एशियाया मध्यभागे बौद्धधर्मेण सह भाषाः, लिपयः, दर्शनानि, कलाश्च गताआसन्। तिब्बतसम्बन्धिबौद्धवाङ्मयं भारतीयानां भोटसम्बन्धिनाञ्च पण्डितानां सहयोगेन तिब्बतभाषायामनूदितमभूत्।

तिब्बतलिपयोऽपि भारतस्यैव विभूतयो वर्तन्ते। अद्यत्वेऽपि तिब्बतमठेषु प्राचीनसंस्कृतग्रन्थाः पूज्यन्ते। दिङ्नागाचार्यस्य न्यायमुखम, आलम्बनपरीक्षा, धर्मकीर्तिनामकाचार्यस्य प्रमाणवार्तिकमित्यादयः कतिपये प्रसिद्धग्रन्थास्तत उपलब्धा अभूवन्। महापण्डित-श्रीराहुलसांकृत्यायनेन दशाधिकपञ्चशती (५१०) हस्तलिखितसंस्कृतपुस्तकसूची तिब्बतमठेभ्य आनीता वर्त्तते। अनेके भारतीयग्रन्था एशियामध्यभाग उपलब्धाः सन्ति। सिकियाङ्गस्य प्रदेशो योऽद्यत्वे मरुस्थली वर्त्तते, सचैकदा सस्यसम्पन्न; प्रदेश आसीत्। तदीयनगरेषु बौद्धानामनेके विहाराश्चैत्यानि चासन्।

यत्र समृद्धपुस्तकालयाः कलावस्तूनि चाऽऽसन्। अस्मिन् स्थानेऽनेकभाषाणां समागमः सम्मेलनञ्च भवतिस्म। अस्मिन् प्रदेशे संस्कृतप्राकृतयोस्तदितरासामपरिचितभाषाणाञ्च ग्रन्थां उपलब्धा अभूवन्। (स्त्यायनेन) भारतप्रयुक्तेन गवेषणाकार्यं कृतमासीत्।

पुरातनविहाराणां भग्नावशेषबौद्धमूर्तयस्तथा कौशेयवस्त्रपत्रेष्वनेकानि चित्राण्युपलब्धान्यभूवन्। अनया गवेषणया एका विलुप्तसभ्यता प्राप्ताऽभूत्। सुर्फान—कूचा—खुसनेषु तथान्येषु च स्थानेषु विपुला सामग्री प्राप्ताऽभूत्। इमे ग्रन्था भूर्जपत्रेषु कङ्कतकेषु चर्मसु काष्ठेषु च लिखिता अभूवन्। एषां लिपिर्गौप्तकालिकी अथवा खरोष्ट्री वर्तते। बौद्धसंस्कृतागमस्य कतिपये ग्रन्था अत्रोपलब्धा अभूवन्। तथा मातृचेटस्य प्रसिद्धास्तोत्राग्रन्थाश्चोलब्धाः। येषां प्रशंसां चीनीयः पर्यटक इत्सिंगः करोति। इतएवाश्वघोषस्य नाटकानामंशाः प्राप्ता अभूवन्। खुतनस्य राज्यकार्यं भारतीयभाषायामासीत्। तथाऽत्रत्यानां राज्ञां नामानि भारतीयान्यासन्। काराशरस्य अग्निदेशेति प्राचीनं नामासीत्। कूचात एव बौद्धधर्मश्चीनं गतवानासीत्। प्रसिद्धः कुमारजीवः कूचामेवाधिवसतिस्म। कूचायाः संस्कृतिः भारतीयाऽऽसीत्। अत्र कातन्त्रव्याकरणस्याध्ययनमासीत्। अफगानिस्ताने १९२२ ईसवीयाब्दात् खननकार्यं प्रवर्तमानमस्ति। हड्डायामनेके स्तूपाश्चैत्यानि मूर्तयश्च प्राप्तान्यभूवन्। वामियाने बुद्धस्य विशालमूर्तयो भित्तिचित्राणि च लब्धानि। अत्र भूर्जपत्रोपरि लिखिताः संस्कृतग्रन्था अपि लब्धाः। इमे माहासङ्घिकविनयग्रन्थास्तथा महायानस्य अभिधर्मग्रन्थानामंशा वर्तन्ते। काबुलस्योत्तरपश्चिमखैरखानिहपर्वतोपरि एको मन्दिरभग्नाव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शेषः प्राप्तोऽभूत् यो गौप्तकालिकमन्दिररचनां स्मारयति। अत्र श्वेत-(सङ्गमरमराख्य) प्रस्तरमयी सूर्यप्रतिमाप्येकाऽधिगता या चतुर्थशताब्द्या वर्त्तते। कम्बुजदेशः (कम्बोडिया) यो हिन्दचीनेऽन्तर्भवति, स नवशतीं वर्षाणि भारतीयसंस्कृतीनामेकं केन्द्रमासीत्। अत्र संस्कृतलेखाः प्राप्ता अभूवन्। अत्रत्यस्थापत्येषु विष्णु-राम-कृष्णकथाः संगृहीताः सन्ति। भारतीयकलानां सौन्दर्यमत्र सम्यग् विकसितं वर्तते। किं बहुना, सुदूरप्रदेशेष्वपि भारतीयग्रन्थाः समुपलब्धाः मैक्समूलरस्य जपानीयेन शिष्येणैकेन जापानस्य एकस्मिन् मन्दिरे सुखावतीव्यूहपुस्तकं प्राप्तमासीत्। चीनं मंगोलियाञ्च बौद्धधर्मेण सह भारतीयसंस्कृतिरपि गताऽऽसीत्। चीनसाहित्याध्ययनेन भारतसम्बन्धिन्यो बह्व्यो वार्ता विदिता भविष्यन्ति। कियत्कालं पूर्वं चीनीयपर्यटकह्यूआनच्वङ्गम्प्रति गयायाः सङ्घारामस्याचार्येण लिखितं पत्रं तदुत्तरञ्च प्रकाशितमासीत्।

अस्मिन् सम्बन्धे नेदं विस्मरणीयं यद्बौद्धधर्मो भारतीय आसीत् तथा तदीयसंस्कृतिर्भारतीयाऽऽसीदिति। अवैदिकयोः सतोरपि बौद्धजैनधर्मयोः कर्मणि कर्मफले च विश्वास आसीत् तथा तावुभौ नास्तित्ववादं खण्डयन्तावास्ताम्। पुनः भारतस्य सर्वमोक्षशास्त्रं चिकित्साशास्त्रवच्चतुर्व्यूहमस्ति। हेयं, हा हेयहेतुर्हानोपायश्चेत्येतच्चतुष्टयं सर्वेषां मोक्षशास्त्राणां प्रतिपाद्यमस्ति। एत एव चत्वारो व्यूहा योगसूत्रे वर्तन्ते। न्यायस्येमान्येव चत्वारि अर्थपदानि (पुरुषार्थस्थानानि) सन्ति। बुद्धस्येदमेवार्यसत्यमस्ति। इमान्येव चत्वार्यर्थपदानि सम्यग्ज्ञात्वा निःश्रेयसमथवा निर्वाणमवाप्यते। सर्वास्वध्यात्मविद्यासु एषां चतुर्णामर्थपदानां वर्णनमुपलभ्यते सर्वाण्येव शास्त्राण्येकरूप्येणाङ्गीकुर्वन्ति, यत्तत्त्वज्ञानं सम्यग्दर्शनं योगसाधनमन्तरेण न भवति। न्यायदर्शने कथितमस्ति, यत् समाधिविशेषाभ्यासेन तत्त्वसाक्षात्कारो भवति, अयमात्मसंस्कारविधिरस्ति। जन्मान्तारोपचितधर्मप्रविवेकेण योगाभ्याससामर्थ्यमुत्पद्यते। अयं धर्मवृद्धेः पराकाष्ठामवाप्नोति। तथा तत्साहाय्येन समाधिप्रयत्नः प्रकृष्टो भवति। तदा समाधिविशेष उत्पद्यते। वैशेषिकसूत्रेऽपि कथितमस्ति, यदात्मकर्मणा मोक्षो भवति। श्रवण-मनन-योगाभ्यास-निदिध्यासनाऽऽसन-प्राणायाम-शम-दमा आत्मकर्मस्वन्तर्भवन्ति, योगसाधना बौद्ध-जैनोभयधर्मेष्वपि प्राप्यते। प्राणायामेन कायचित्तयोः प्रश्रब्धिर्भवति। यथा न्यायशास्त्रं प्राणायामाशुभसंज्ञाभावनयोर्विशेषमहत्त्वमुपवर्णयति, तथैव बौद्धागमेऽपि ताभ्यां विशिष्टं स्थानं दत्तमस्ति। अनेन कामरागयोः प्रहाणं नानाविद्याकुशलवितर्कोपशमश्च जायते। मैत्र्याभावनाया अपि विशिष्टं माहात्म्यमस्ति। इत्थं योगसाधना वैदिकावैदिकधर्मानेकत्र सूत्रे बध्नाति। इयं साधना समानरूपेण तदैव सर्वैः स्वीकर्तुं शक्येत, यदा सर्वेषां मौलिकविचारेष्वपि कथङ्कथमपि सादृश्यं भवेत्। मामकीना धारणा वर्त्तते यद्विविधसम्प्रदायसत्त्वेऽपि यद्यस्मदीयदेशे धर्मनाम्ना रक्तपातोऽभूत इवास्ति, तदा तत्कारणमिदमप्यस्ति यदेषां मोक्षसाधना समानाऽऽसीत्, तथा यस्मिन् युगे भक्तिमार्गप्रभाव ऐधिष्ट तस्मिन् युगे बौद्धधर्मेऽपि भक्तेरुपासनायाश्च प्राबल्यमासीत्। मया एतदर्थमेतदुल्लिखितं यत्कुत्रापि भवान् बौद्ध-जैनागमान्नोपेक्षत। एषु ग्रन्थेषु भारतीयसमाजशास्त्रेतिहासानां कृते प्रचुरसामग्री मिलति। बौद्ध-जैनविद्वद्भिर्न्याय-दर्शन-व्याकरण-काव्यविकासनविधौ विशिष्टभागो गृहीतः। ईदृशभारतीयवाङ्मयस्य संरक्षणं प्रचारणञ्च युष्माकमस्माकञ्च कर्तव्यतामर्हति। मया भारतीयसंस्कृतिविस्तारस्य किञ्चिद्विवरणमेतदर्थं कृतं यदस्मदीयस्नातकानामेतस्याः समृद्धेर्मूल्यस्य च ज्ञानं भवतु। एतत्कार्यमस्य महाविद्यालयस्य मुख्यमुद्देश्यं भवितुमर्हति। परन्त्वेतत्कार्यं तावन्न सम्पत्तुमर्हति यावद्वयमालोचनायां गवेषणायाश्चाधुनिकपद्धतिं न स्वीकुर्वीमहि। अन्वेषणार्थमत्र महताऽऽयोजनेन भवितव्यम्। वयं स्वकीयनिधेः रक्षणं तन्मूल्याङ्कनञ्च यथावन्न कर्तुं पारयिष्यामः, यावत्संस्कृतविश्वविद्यालये संस्कृतेन साकं पालि-प्राकृत-चीनीय-भोटीयभाषाणां कतिपयपाश्चात्यभाषाणाञ्च शिक्षणव्यवस्था न करिष्यते। पुनरद्यत्वे नवीनशास्त्राणामुद्रमोऽभूत् तथा प्राचीन-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्या विकासमासाद्य प्रौढ़ावस्थापन्ना वर्तन्ते । अनुसन्धानकार्यार्थमेषां मध्ये येषां शास्त्राणां विद्यानाञ्च यावज्ज्ञानमावश्यकं भवेत्, तावदस्मदीयविशेषज्ञैः प्राप्तुमुचितम् । यथा भाषाविज्ञानसिद्धान्तज्ञानमन्तरा वयं प्राचीनग्रन्थानां कतिपयस्थलेषु यथावदर्थान्न लापयितुं प्रभवामः । वैदिकसाहित्यज्ञानार्थमनेकजातीनां सांस्कृतिकेतिहासानां तथा तदीयभाषाणां ज्ञानमप्यावश्यकम् । भारतेऽनेकजातयो यथासमयमागच्छन्त्य आसन्, या भारतीयसमाजेऽन्तर्भूताः सन्ति । तासामाचारविचारप्रभाव आर्यसंस्कृतिष्वापतितः । उत्तर–पश्चिमेष्वनेकेषां धर्माणां संस्कृतीनाञ्च मेलनं परस्परमादानं प्रतिदानञ्चाभूत् । तत्रत्यकलासु यवनानां ईरानीयानाञ्च (आर्याणां) कलानां प्रभाव आपतित आसीत् । गान्धारेष्वनेकशैलीनां विकासोऽभूत्, तासां पूर्णनिष्पत्तिः खूतन–कूचा–तुर्फानप्रभृतिषु कलाप्रसिद्धकेन्द्रेष्वभूत् । अस्मिन् प्रदेशे बौद्धधर्माणां संस्पर्श ईरानीय–मगीयप्रभृतिधर्मैरभूत ।

अतोऽस्य युगस्य धर्मं सांस्कृतिकमितिहासञ्च ज्ञातुम्, एषां विविधानां धर्माणां संस्कृतीनाञ्च ज्ञानमावश्यकम् । भारतीयसमाजशास्त्ररचनार्थमद्यत्वे केवलमेतावन्न पर्याप्तं वर्तते यद्वयं विविधग्रन्थद्वारा तथ्यानां संग्रहं कुर्याम, किन्तु सहैव पाश्चात्यसमाजशास्त्र–नृतत्त्वाद्युपयोगिशास्त्रोक्तसिद्धान्तानां, तत्र संगृहीतसामग्रीणाञ्च ज्ञानमावश्यकम् । अस्मिन् महाविद्यालये एतत्कार्यस्य कृते अनेकाः सुविधाः सन्ति । सर्वमहान् विषयस्त्वयमस्ति यद्भवतां सविधे एको बृहत्पुस्तकालयो वर्तते । यत्र हस्तलिखितानां मुद्रितानाञ्च ग्रन्थानां समीचीनः संग्रहो वर्तते । हस्तलिखितपुस्तकानां सूचीपत्रं सम्पाद्यते । तथा प्राचीनपुस्तकप्रकाशनव्यवस्थापि कृता वर्तते । काशी संस्कृतशिक्षाणां प्रसिद्धकेन्द्रमस्ति । तत्रा प्राचीनशैलीनामनेके विद्वांसोऽत्र प्रवचनं कुर्वन्ति । नवीनशैलीसंस्कृतविदुषां सहयोगस्य परमावश्यकता वर्तते । व्यतीतेषु त्रिंशद्वर्षेषु यैर्भारतीयैः संस्कृतविद्योद्धरणात्मकं श्लाघ्यं कार्यं कृतम्, तेषामधिकांशास्त एव वर्तन्ते, यैः पाश्चात्यगवेषणाप्रकारेषु शिक्षिता अभूवन्, यैश्चाभिनवप्रकारैः शिक्षाप्राप्ता । एषां सहयोगेनात्रत्याः स्नातका अपि एतत्कार्यस्य कृते प्रस्तुताः कर्तुं शक्यन्ते । अस्यातीवावश्यकता वर्तते । यदाहं विद्यार्थी काश्यामासं तदा संस्कृतमहाविद्यालयस्य कतिपये शास्त्रिणः फ्रेंच–जर्मन–पालिप्रभृतिभाषा अधीयाना आसन् । तथा तेभ्यश्छात्रवृत्तयो दीयन्तेस्मा परन्त्वेषां सख्या अल्पीयस्यासीत् । अधुना एतदेव कार्यं महता परिमाणेन समारोहेण कर्तुमावश्यकं वर्तते । एतदर्थमासां भाषाणामध्यापनस्य छात्रवृत्तीनाञ्चोचितव्यवस्थया भवितव्यम् । स्वप्राचीनग्रन्थानां प्रामाणिकसंस्करणान्यपि न निर्गन्तुमशकन् । महाभारतसदृशप्राचीनग्रन्थानां किमपि प्रामाणिकं संस्करणं न भवेदिति महत्या लज्जाया विषयो वर्तते । किन्तु भण्डारकर-प्राच्यगवेषणासंस्था वैकल्यमेतत्पूरयति अस्या आरम्भः १९१९ ईसवीयाब्देऽभूत् । अद्यत्वेऽपि नैतत्कार्यं समाप्तमभूत् । अस्मिन् कार्ये यावत्काठिन्यं बृहत्त्वञ्च वर्तते तावदेव तस्य महत्त्वमप्यस्ति । अशुद्धपाठद्वारा ये विविधा निष्कर्षा निष्कासितास्ते सदोषाः प्राप्ताः सन्ति ।

यदा आदिपर्वणो वैज्ञानिकसंस्करणम् १९३३ ईसवीयाब्दे प्रकाशितमभूत्, तदा तत्र विश्वविद्वद्भिर्महान् सन्तोषः प्रकटितः । तथा तत्संस्कृतभाषाविज्ञानेतिहासस्य सर्वतो महत्त्वपूर्णा घटनां प्रदर्श्य डा. सुक्थंकरस्य प्रशंसा कृताऽऽसीत् । आधुनिकवैज्ञानिकपद्धतिज्ञानं विना महत्त्वपूर्णमिदं कार्यं न भवितुमर्हति । पुराणेष्वपि बहुशोधनकार्यं कर्तव्यमस्ति । हस्तलिखितपुस्तकान्वेषणेनापि अप्रतिहतेन भवितव्यम् । तद्रक्षायाः उचितविधानेन च भवितव्यम् विज्ञानसाहाय्यमन्तरा ईदृशमपि साधारणकार्यं न भवितुमर्हति । यानि पुस्तकानि जीर्ण–शीर्णतामापद्यन्ते तेषां रक्षाया एकमात्रमुपायस्तेषां चित्रणं वर्तते । "कार्यमिदं माइक्रो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

फिल्म, फोटोस्टैट कैमरा," साहाय्येन सौकर्य्यमासादयति-। अस्मिन् सम्बन्धे मदीयमेकं निवेदनं विद्यते यत् "इण्डिया आफिस लाइब्रेरी" मध्ये संगृहीतानि पुस्तकानि प्रत्यानेतुं प्रत्यावर्तयितुं च चेष्टनीयम्। समाचार-पत्रैः प्रतीयते यदेतादृशी शासकैर्वाकिञ्चिच्चेष्टा चरीक्रियते। यद्येतत्सत्यं तर्हि परमसन्तोषविषयोऽयमस्ति। इङ्लैण्डातिरिक्तदेशान्तरेषु ये ग्रन्थाः प्राप्ताः सन्ति, तच्चित्रप्राप्तिप्रयत्नेन भवितव्यम्। एकमेतादृशं विधानं निर्मातव्यम् यद्भारतद्वहिः कोऽपि प्राचीनग्रन्थः चित्रस्य कालाया वा वस्तु न गच्छेत्।

मामिकेयं संस्कृतविश्वविद्यालयकल्पना वर्तते यदत्र प्राचीनशास्त्राणांस्वाध्यायप्रवचनाभ्यां सह गवेषणायाः पूर्णव्यवस्थया भवितव्यम्। एतदर्थं यासां भाषाणां नवीनशास्त्राणाञ्च शिक्षणमपेक्षितं, तत्प्रबन्धेनापि भवितव्यम्।

अस्मिन् गवेषणाकार्ये प्राचीन-नवीनोभयविधशैलीशालिनां विदुषां सहयोग आश्रयणीयः। विद्यालयोत्तीर्णाश्चाचार्यजनाश्छात्रवृत्तिवितरणेनान्वेषणकार्यस्य कृते सन्नाहयितव्याः।

अत्रेदृश्यापि व्यवस्थया भवितव्यं यया विश्वविद्यालयान्तरं विद्वांसोऽत्रागत्यानुसन्धानकार्ये सहयोगं दातुं शक्नुयुः। किन्त्वनया व्यवस्थया पूर्णलाभस्तदैव भविष्यति, यदाऽत्रत्य पाठ्यक्रम उचितरीत्या परिवर्तयिष्यते। आधुनिकयुगे पुरातनपद्धत्या संस्कृतशिक्षा तदैव स्वोद्देश्यं पूरयितुं शक्नोति, यदा शास्त्रीयशिक्षया सह मौलिकशिक्षाया अपि व्यवस्था क्रियेत। प्रत्येकविद्यार्थिनः केवलं स्वजीविकोपार्जनं न कर्तव्यं किन्तु तेन एक नागरिककर्तव्यमपि पालयितव्यम्। तथा अस्मादप्युत्कृष्टेन तेन मनुष्येण भवितव्यम्। मनुष्यत्वमपि प्राचीनयुगसम्बन्धि नापेक्ष्यते, किन्त्ववर्तनयुगसम्बन्धि, यदा समाजेन स्वसामञ्जस्यमपहृतं, यदा विचारेषु सङ्घर्षः प्रचलति। एकप्रकारिकाऽनिश्चितरूपता च वर्त्तते। यया जीवनविषये काचन स्पष्टोत्कृष्टा च दृष्टिर्न निष्पत्तुं शक्नोति। स मनुष्यः कीदृशोऽस्ति यः स्वमातृभाषासाहित्यं न परिचिनोति। य एक शास्त्रविशेषज्ञतालोभेन साहित्यस्य कलायाश्चामरकृतीरुपेक्षते। स मनुष्यः कीदृशोऽस्ति, येन संसारस्येतिहासोऽपरिचितस्तिष्ठति, यस्य वर्तमानसमस्यानां घटनानां ज्ञानं नास्ति, स स्वविषयविशेषज्ञो भवितुं शक्नोति किम्? यदि स विज्ञानविद्यार्थी वर्तते, तदा स कुशलशिल्पीभवितुं शक्नोति। यदि स स्मृतस्य शास्त्री आचार्यो वा वर्तते तदा स पौरोहित्यमध्यापनं वा कर्तुं शक्नोति। किन्तु द्वावपि अन्यदीयोपकरणरूपावेव भवितुमर्हतः, तथा समाजं राजनीतिञ्च सञ्चालयितुमात्मानावसमर्थौ मन्येते। तत्कारणमिदमस्ति यत्ते स्वकीयं व्यवहारं जानन्ति, किन्तु शिक्षां जीवनपरमोद्देश्यञ्च न जानन्ति। तेषां दृष्टिर्व्यापिका नास्ति, नापि तेषां शिक्षाक्षेत्रमियद्विस्तृतं वर्तते यत्तान् जीवनविविधक्षेत्राणां कृते सामान्यतः शिक्षयेत्।

तस्मात्प्रत्येकविद्यार्थिनः कृते ईदृश्या पाठ्यपद्धत्या भवितव्यं, यया परमावश्यकं ज्ञा° तस्मै दातुं शक्येत। अनया दृष्ट्या डा० भगवान दास समितेः प्रस्तावान्निष्कर्षांश्च सामान्यतोऽहं समर्थयामि। नव्य विषयाणां समावेशस्तु दूरे तिष्ठति, वर्तमानप्रणाल्यनुसारमपि एकाङ्गमेवाध्ययनं कर्तुं पार्यते। अतः पाठ्यक्रमक्षेत्रमस्माभिर्द्वेधा विस्तारणीयं, संस्कृतविद्यापाठ्यविधेर्व्यापकतायाः सर्वाङ्गीणतायाश्च सम्पादनेन, तत्र हिन्दीतिहास-भूगोल-राजशास्त्र-गणितादाधुनिकविषयनिवेशनेन च।

मौलिकाध्ययनेन सहैव विद्यार्थिनां तुलनालोचनात्मकाध्ययने प्रवृत्तिरुत्पादनीया। एभिः सिद्धान्तैरध्ययनपद्धतिः पुनर्निर्मातव्या।

किन्त्वेतदवधेयं यज्ज्ञानगाम्भीर्यमल्पं न भवेत्। तथा गाम्भीर्यं रक्षद्भिरावश्यकमात्रया तस्य विस्तारोऽपि विधीयेत। यावदाधुनिकं ज्ञानमेकस्य साधारणविद्यार्थिनः कृते नितान्तमावश्यकमस्ति, तावत्तु संस्कृतपाठ्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शालाछात्रैरप्यर्जनीयम् । अहमेकस्यावश्यककार्यान्तरस्य विषये भावकं ध्यानमाकृष्टुमिच्छामि, तच्च कार्यं संस्कृतवाङ्मयस्य हिन्दीभाषायामनुवादरूपम् ।

यदि हिन्दीभाषायामस्मदीयप्राचीनग्रन्थरत्नानामनुवादः प्रस्तुतो भवेत्तर्हि तेन भारतीयसंस्कृतिप्रचारे महत्साहाय्यं स्यात् । भवन्तो नाधुनिकभाषानुपेक्षितुमर्हन्ति । समस्तं राजकार्यमास्त्रेव भाषासु भवितुं प्रस्तुतमस्ति । विश्वविद्यालयेषु शनैः शनैः राष्ट्रभाषाद्वारैव माध्यमिकशिक्षणं प्रवर्तयिष्यते । भवद्भिर्मातृभाषा न तिरस्करणीया । इदानीमसौ समयो नास्ति यत्र कोऽपि लेखकः कोऽपि कविर्वा पृछयेत यत्त्वं संस्कृतमपहाय हिन्द्यां गद्यं पद्यं वा कार्य्यं रचयितुं कुतः प्रवृत्तोऽसि । एतदुत्तरं राजशेखरेण गोस्वामिना तुलसीदासेन च दत्तं वर्तते । राजशेखरदृष्ट्या संस्कृतबन्धे पारुष्यमस्ति, प्राकृतबन्धे च सौकुमार्यम् । मेनाग्रे गत्वोक्तं यत्, उक्तिविशेष एव काव्यं भाषा तु कापि भवेत् । राजशेखरसमये संस्कृतकाव्यं कृत्रिमं क्लिष्टञ्चाभूत् । इयं तस्य ह्रासावस्थाऽऽसीत् । रामायण-महाभारत-महाभाष्य-शाङ्करभाष्यशैली विस्मारिताऽऽसीत् । काव्यस्य प्रसादगुणो विलुप्त आसीत् । भामहस्य कथनमस्ति, यत्काव्येन क्लिष्टेन दुरूहेण च न भवितव्यम् । तदर्थज्ञानाय कस्याश्चन टीकाया आवश्यकतया न भवितव्यम् । तेनैतादृशसरलेन भवितव्यम् यत्साधारणशिक्षितजनेन बालकेन स्त्रियापि तदनुबोधं भवेत् । गद्यस्य प्राणभूतमोजो वर्तते (ओजो गद्यस्य जीवितम्) यदा संस्कृतं कस्यापि वर्गस्य व्यावहारिकभाषा नास्ति, तदा तत्र कृत्रिमत्वं स्वाभाविकम्, तर्हि पाण्डित्यप्रदर्शनमेवैकमात्रं काव्यरचनाया उद्देश्यमवशिष्टम् । काव्यस्य हृदयग्राहित्वं व्याहतञ्च । माधुर्य-प्रसादगुणौ मातृभाषासाहित्येऽपि सुगमतया सह सन्निवेष्टुं शक्नुतः । अतः मातृभाषया साहित्यसृष्टावस्माभिर्गौरवमनुभवितव्यम् । मया स्वबुद्ध्यनुसारमेतद्बोधयितुमचेष्टि । यत्संस्कृतविद्यालयस्य किमुद्देश्यं कश्च कार्यक्रमो भवितुमर्हति ।

अत्राहमेतत्स्पष्टीकर्त्तुमिच्छामि यदस्मिन् विश्वविद्यालये तेषां सर्वेषां विषयाणामध्ययनस्य सामान्यतो व्यवस्थाया नावश्यकता वर्तते, येषां प्रबन्धो विश्वविद्यालयान्तरेषु भवति । तत्रत्याध्ययनाध्यापने अद्यत्वे राष्ट्रभाषायां भविष्यतः । अतो यैस्तद्विषयकशिक्षा जिघृक्षिता ते तत्र गन्तुमर्हन्ति । एतत्सुविधया अवश्यमाव्यम् । किन्तु संस्कृतविश्वविद्यालयस्य विशेषलक्ष्यमेकं वर्तते यस्य पूर्तिरन्यविश्वविद्यालयेषु न जायते । एकप्रकारेणायं विद्यालयोऽपि वर्तते, प्राच्यविद्यान्वेषणकार्यस्य प्रधानकेन्द्रञ्च वर्तते । ज्ञानराशिरनन्तोऽस्ति तस्य सीमा न वर्तते अद्यत्वेऽनेकनवीनशास्त्राणां प्रतिष्ठाऽभूत् । ज्ञानस्य विस्तार इयानभूत्, येनान्तराष्ट्रियमहायोगमन्तरा गवेषणाकार्यं दुष्करमजनि । ज्ञानमिव पवित्रमन्यद्वस्तु नास्ति । अतो विदेशीयेभ्योऽपि तद्ग्रहणे न संकोचनीयम् । पुराप्यस्माभिः स्वाध्यायप्रवचनयोः संकोचो न दर्शितः । अद्यत्वेऽप्यस्माभिरुदारधिया व्यापकदृशा च कार्यं साधनीयम् । अस्मिन्नेवास्माकं मङ्गलमस्ति ।

एवमेव भारतस्य सर्वतोमुखी प्रतिभोन्नीता भवेत् । संस्कृतस्यादरः सम्मानश्चाधिकाधिकमात्रया वर्धिष्यते । जगतः प्रतिप्रतिष्ठितविश्वविद्यालयं संस्कृतशिक्षायाः समुचितः प्रबन्धः कृतो वर्तते । पाश्चात्य जगद्विद्वांसो गवेषणाकार्येऽस्माकमग्रे गता वर्तन्ते । तेषु ज्ञानपिपासा वर्तते यतो ज्ञानं ग्रहीतुं शक्यते, ततस्तद्ग्रहणे तेषामोषदपि संकोचो न भवति । अस्मासु तु भिन्नागर्वश्चित्तोद्वेगश्चास्ति, आत्मावसादो वा वर्तते । तदुभयमपि परित्यज्य संस्कृतवाङ्मयस्य च प्रचारणयोः प्राणपणैः प्रवर्तनीयमस्माभिः । ये विद्यार्थिनः स्वशिक्षां समाप्योपाधिं गृह्णन्ति, तेषामस्मिन् विषये विशेषत उत्तरदायित्वं वर्तते । अहं जानामि यत् कीदृशविषमपरिस्थितौ भवन्तः स्नातकाः स्वाध्ययनाध्यापने निर्वहन्ति । प्रवाहप्रतीपतायामपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवतां संस्कृतविद्यारक्षणाध्यवसायः स्तुत्यो वर्तते। भवतां जीविकानिर्वाहायाधुनाकतिपयान्यवृत्तिद्वारमुद्घाटनमर्हति। केवलवैरोहित्याध्यापनवृत्तयो न पर्याप्ताः। अनया दृष्ट्या भवद्भ्यः कतिपयान्यपरीक्षासूपांस्थतये सुविधाप्रदानमुचितम्। अनया दृष्ट्यापि पाठशालीयपाठनविधिषु परिवर्तनावश्यकता प्रतीयते।

पाठ्यग्रन्थावलीसंशोधनसमित्या स्वनिश्चयेष्वेषां विषयाणामपि ध्यानमरक्षि। भवतामार्थिकदशासंशोधनं, देशावश्यकतापूर्तये सामर्थ्यसम्पादनञ्च समाजस्य कर्तव्यमस्ति।

एतावतो विद्यार्थिनो विविधैरुपाधिभिः पदवीभिश्च विभूष्यमाणान् दृष्ट्वाऽहं प्रसीदामि। अहं भवतां शुभं चिन्तयामि, प्रार्थये च यद्भवन्तः समाजे स्वयोग्यतानुरूपं स्थानमवाप्य शीघ्रं कार्ये नियुक्ता भविष्यन्ति। तथाऽद्य भवद्भिः प्रतिज्ञा अङ्गीकृताः ताः सदा रक्षिष्यन्ति। यस्मिन् युगे वयं वर्तामहे, तस्य स्वतो वैशिष्ट्यं वर्तते। अस्मदीयसभ्यतायामाधुनिकविज्ञानस्य महान् प्रभाव आपतितः अद्यत्वे संकुचितविचारधारयाऽस्माकं कल्याणं न भवितुमर्हति। अस्माकं दृष्टौ साम्प्रदायिकतया प्रान्तीयतया च न भवितव्यमपि तु राष्ट्रीयतया अन्तराष्ट्रियतया च।

आम्नोऽयमप्रवृत्तिभ्य ऊर्ध्वमुत्थातुमस्माकं सत्साहसेन सद्विवेकेन च भवितव्यम्। प्राचीनसंस्कृतेरुत्कृष्टानंशान् रक्षद्भिरस्माभिराधुनिकयुगस्य सामाजिकानि आध्यात्मिकानि च मूल्यानि रक्षणीयानि।

राष्ट्रियैकतायाः कृते कस्यापि भाषाविशेषस्य लिपिविशेषस्य वा अनुचितपक्षपातमपहाय केवलराष्ट्रहितैकतया प्रवर्तनमनिवार्यं भविष्यति। जनतन्त्रभावनया प्रेरितानामस्माकं सर्वाणि कार्याणि कर्तव्यानि भविष्यन्ति।

अस्माकं वैज्ञानिकं चिन्तनं भविष्यति। तथा वयं निरन्तरं ज्ञानवृद्धिं करिष्यामः। यया कुशलचेतनया प्रेरितैः प्राचीनऋषिभिः सकलसमाजकल्याणाय सन्मार्ग उद्घाटितः, तामेव भावयित्वा, तैरेवार्यैरुदात्तैश्च भावैराकृष्टा भूत्वा वयमाधुनिकावश्यकतापूर्तये व्रतिनो भवेम, बहुजनसमाजस्य हितं सुखञ्च विधाय अभ्युदयनिःश्रेयसप्राप्तये यत्नवन्तश्च भवेम। तदैव वयं स्वकल्याणं विश्वकल्याणञ्च कर्तुं शक्ष्यामः। तदैव संसारे शान्तिः पुष्टिस्तुष्टिश्च भविष्यति। आशासे भवन्त ईप्सितफलं लप्स्यन्ते। संस्कृतविश्वविद्यालयस्यायं शुभसंकल्पो विद्वज्जनसाहाय्यमासाद्य फलेग्रहिर्भविष्यति।

प्रवर्ततां प्रकृतिहिताय पार्थिवः, सरस्वती श्रुतिमहतां महीयताम्॥

सार्थोनन्दतु सज्जनस्य सकलो वर्गः खलानां पुनर्नित्यं खिद्यतु, सन्तु वाडवजनाः सत्याशिषः सर्वदा।
मेघो मुञ्चतु सञ्चितं सुसलिलं सस्योचितं भूतले, लोको लोभपराङ्मुखोऽनुदिवसं, धर्मे मतिर्वर्धताम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सभापति माननीय श्री गोविन्द वल्लभपन्त महोदय का भाषण

संस्कृत हमारी संस्कृति का आधार है। इसी से हम अपने प्राचीन दर्शन इतिहास आदि का ज्ञान प्राप्त करते हैं। ज्ञान का यह स्रोत जब तक बना रहेगा तब तक हमारी संस्कृति भी बनी रहेगी। अरसे तक संस्कृत का स्थान दबा हुआ रहा। स्वाधीनता के बाद संस्कृत को आगे बढ़ाना, उसका विकास करना हमारा कर्तव्य है। स्वतन्त्र भारत में स्नातकों को संस्कृत भाषा का ही नहीं बल्कि भारतीय संस्कृति का भी दिग्दर्शन कराना है। पण्डितों को ध्यान रखना होगा कि संस्कृत का पाण्डित्य बनाये रखें पर साथ ही संसार में ज्ञान का जो स्रोत बह रहा है उससे वंचित भी न रहें।

संस्कृत किसी जमाने में भारत तथा कई और देशों की भाषा थी। हिन्दूकुश से लेकर तमाम पूर्व में यह फैली हुई थी। कितने ही देशों में संस्कृत मिश्रित भाषाएं बोली जाती थीं। हमारे दर्शन शास्त्रों ने दूसरे देशों के लोगों को चकित कर दिया था। हमारे नाटकों ने पाश्चात्य देशों के बड़े से बड़े विद्वानों को अचम्भे में डाल दिया था। हम संस्कृत कालेज के परिवर्द्धन के विषय में विचार कर रहे हैं। हम इसे शीघ्र ही संस्कृत विश्वविद्यालय बना देना चाहते हैं। आशा है कि कालेज एक ऊंचा स्थान ग्रहण करेगा जिससे समाज का कल्याण निरन्तर होता रहेगा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाट्याभिनय के अवसर पर माननीय शिक्षा मंत्री महोदय का वक्तव्य

मुझे यह देख कर सन्तोष हुआ कि संस्कृत छात्रों ने इधर एक वर्ष में काफी उन्नति की। उन्हें समय की गति पहचाननी चाहिये पर साथ ही उन्हें अपने प्राचीन आदर्श नहीं भूलना चाहिये।

एकांकी नाटकों का यह अभिनय सर्व प्रथम प्रयास है और इस दृष्टि से इसमें छात्रों ने आशातीत सफलता प्राप्त की है। यों तो मुझे सभी के अभिनयों ने आनन्दित किया, परन्तु जिन्हें हम सब की सफलता का प्रतीक कह सकते हैं, वे कुछ विशेष छात्र हैं, एक तो वह, जिन्हों ने कर्णभार में कर्ण का अभिनय किया। दूसरे हैं दूत घटोत्कच में दुर्योधन का अभिनय करने वाले। शर्विलक (चोर) का अभिनय मुझे कला की दृष्टि से बहुत पसन्द आया पर मुझे आशा है कि आप लोग भी इसे कला की दृष्टि से पसन्द करेंगे, बाहर इसका अनुकरण नहीं करेंगे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चित्रोद्घाटनम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महामहोपाध्यायः, सी० आइ० ई० श्री बापूदेव शास्त्री

अस्य महानुभावस्य जन्म कोङ्कण-प्रदेशान्तर्गत 'कायगांव कोटा' संज्ञकग्रामे सीतारामशर्म्मणः पितुः सत्यभामायां साध्वीरत्नभूतायां १८७६ वैक्रमाब्दे समजनि। नृसिंहशास्त्रीति कृतनामधेयोऽप्यसौ महात्मा 'बापू' इति नाम्नैव प्रसिद्धो बभूव।

अयं वृद्धैः प्राचीनपरिपाटीमनुसृत्य अष्टाध्यायी-अमरकोष-काव्य-आयुर्वेद-स्ववेदशाखादिकमध्यापितोऽभूत्। परमस्य गणितविषय एव बाल्यात्प्रभृति सविशेषं प्रतिभा प्रवर्त्तते स्म। कान्यकुब्ज-ढुंढिराज-पण्डितादसौ लीलावतीं बीजगणितं चाधीतवान्।

कदाचित् प्रसङ्गेन तात्कालिक 'सिहोर' राज्यपोलिटिकल एजेण्ट महोदयः श्री एल्० विलकिन्सनः गणितविषये बापूदेवशास्त्रिणं कांश्चित्प्रश्नान् पृष्ट्वा तदीय-प्रतिभातिशयपरितुष्टः पण्डितसेवारामनिकटे सिद्धान्त-विषयमध्येतुमेनं प्रवर्तयामास, स्वयं च रेखा-गणितादिकमध्यापिपत्। ततश्च कियता कालेन प्रखरतर-बुद्धि-वैभवार्जितयशोराशिरयं काशिक-राजकीय-संस्कृत-महाविद्यालये गणिताध्यापकपदमलङ्कृत्य, बहून् दिगन्तकीर्त्तीन् शिष्यान्निर्माय, बहुविधान् निबन्धान् प्रणयन्, सुरसरस्वतीमारिराध। अस्य आंग्लभाषाज्ञानमपि श्लाघनीय-मासीत्। महान्तः पश्चिम-देश-ज्योतिर्विदोऽपि स्वशङ्कानां समाधानं बापूदेवमहोदयाल्लब्ध्वाऽमुष्य यशोराशिं विदेशेष्वपि प्रसारयामासुः।

१८६४ ईसवीयाब्दे सोऽयं लण्डनस्थ रायल-एशियाटिक-सोसाइटी-परिषदा सदस्यत्वेनाऽङ्गीकृतः। १८७० खीस्ताब्दे शास्त्रिवर्यः कलिकाताविश्वविद्यालयस्य मान्यसदस्यः (फेलो) सञ्जातः। १८७९ ई० अब्दे सर्वशुद्धं नूतन-पञ्चाङ्गमेतेन प्रवर्तितं, यदद्ययावत् तत्तनयः सुगृहीतनामा श्रीगणपतिदेवशास्त्री सञ्चालयति। १८७७ खीस्ताब्दे विक्टोरिया-महाराज्ञ्या 'स्टार' पदकेनाऽयं पुरुष-मणिरलङ्कृतोऽभवत्। १८७८ खीस्ताब्दे राजेश्वर्या—सी० आइ० ई० विरुदेन विभूषितोऽ महानुभावः। १८८७ खीस्ताब्दे च महाराज्ञ्या सुवर्ण-जयन्ती-प्रसङ्गे महामहोपाध्यायपदव्या च मण्डितः पण्डितधौरयः।

ज्योति-र्गणित-विषये सांप्रतिके काले बापूदेवशास्त्री निस्तुलः, काशिक-राजकीय-संस्कृत-महाविद्यालयस्य यशोवर्द्धको महापुरुषश्चाऽऽसीत्।

१८९० ईसवीयाब्दस्य जूनमासे सप्तमदिवसे पुरुषभास्करोऽयं शिव-सायुज्यमवाप।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



महामहोपाध्याय पं० बापूदेव शास्त्री, सी० आई० ई०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महामहोपाध्याय पं० कैलाशचन्द्र शिरोमणि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महामहोपाध्यायः श्रीकैलासचन्द्रशिरोमणिमहाशयः

वङ्गेषु वर्धमानमण्डले 'धात्री' नामा कश्चिदस्ति ग्रामः । तत्र श्रीघनश्यामसार्वभौमो नाम पण्डित-प्रवरः कृतवसतिरासीत्, तत्पत्न्यां श्रीमत्यामादरमणिदेव्यां १७५२ शकाब्दे श्रीशिवाराधनकृपया श्रीकैलासचन्द्रो जन्म लेभे । बाल्यात्प्रभृति बुद्धिमत्तमोऽयं दशवर्षवयाः निजपितृव्यश्रीजनार्दनतर्कवागीशतो व्याकरण-कोष-काव्याद्यधीत्य प्ररूढव्युत्पत्तिर्न्यायशास्त्राध्ययनाय स्वग्राम-निकटस्थ-देवीपुर-ग्रामे कृतवसतिं जराजर्जरं श्रीहरचन्द्र-न्यायवागीशमहोदयमुपाससाद । तत्र च सामान्य-निरुक्तिपर्यन्तमध्यैष्ट । अस्मिन्नेव काले श्रीतरङ्गिणीदेव्या सहाऽस्य पाणिग्रहणविधिरप्यभूत् । श्रीकैलासचन्द्रो विद्याभ्यास-सतृष्णहृदयो नवद्वीपं विद्यानिकेतनमुपगम्य श्रीमद्-गोलोकनाथन्यायरत्नमहाशयात्, तस्मिंश्च स्वर्याते, श्रीमत्प्रसन्नचन्द्रतर्करत्नमहाशयाच्च सकलं न्यायवैशेषिक-शास्त्रमधीत्य, तत्रत्यैर्विद्वद्भिः परीक्षितः, शिरोमणिरित्युपाधिना सत्कृतश्च स्वग्रामं प्रत्याजगाम । ततश्च स्वगृह एव पाठशालायां पारेशतं विद्यार्थिनो वर्षत्रयं यावत् पाठयामास महाशयः । अथ दुर्दैवात् ज्येष्ठे भ्रातरि, जनन्याञ्च दिवङ्गतायां, तदीय-श्राद्धोद्भवादृणादात्मानमुद्धर्तुं पाटलिपुत्रस्थं कंचित् स्व-सुहृदं प्रत्यसौ प्राऽतिष्ठत । सुहृदि चाऽनुपलब्धे द्वाभ्यां शिष्याभ्यां सहाऽयं श्रीविश्वेशपुरीं काशिकामेव-शरणीचकार ।

अत्र च पूर्वं कतिचिद्दिनानि कष्टेनैव भोजनाच्छादनादिव्यवस्थां परिचालयन्, शनैः शनैर्जनेषु प्रसृते पाण्डित्य-यशःसौरभे, समागतान् सहस्रशोऽन्तेवासिनः पाठयन्, सकलैरपि पूजितश्चिरमुवास ।

अत्र च वेदान्तवाचस्पतेर्द्राविडादच्युतानन्दपरिव्राजकाद् वेदान्तशास्त्रमधीत्य, तं च न्याय-वैशेषिकतन्त्र-मध्यापयामास । एवं वेदान्तेष्वपि पाण्डित्य-प्रकर्षोऽस्य ववृधे ।

शास्त्रार्थेषु वाचस्पति-प्रतिमोऽयं गभीरतरविचार-धारा-मग्नः साधारणैर्विद्वद्भिर्दुर्ज्ञेय एवाऽऽसीत् । अथैतद्गुण-गण-समाकृष्टः श्रीबापूदेवशास्त्री सी० आई० ई० महोदयः १९२५ वैक्रमाब्दे सबहुमानमेनमाहूय न्याय-शास्त्राध्यापकपदे काशिकराजकीयमहाविद्यालये तदध्यक्षद्वारा स्थापयामास । तदानीन्तनोऽध्यक्षः श्रीमानार्थरवे-निसमहोदयश्च गुरुमिव शिरोमणिमहाशयं मन्यतेस्म । १८९६ ईसवीयाब्दे 'महामहोपाध्याय' पदेन सम्राह्या सोऽयमभिपूजितः पण्डितमहाशयः । १९०७ ईसवीयाब्दे ज्येष्ठसुतस्य निधनेन निर्विण्णोऽयं राजकीय-स्थाना-दवकाशमादाय भगवदाराधनैकतत्परोऽभवत् । षडधिकसप्ततिवर्षात्मके वयसि सौरचैत्र-तृतीय-दिने पार्थिवं वपुः परित्यज्य शिवात्मकतामाप सोऽयं नैयायिक-शिरोमणिः ।

शिरोमणिमहाशयः प्राचीनपरम्पराया आदर्शभूत एवाऽऽसीत् । धर्मशास्त्र-मर्यादाया अक्षरशः पालं कृतमेतेन महात्मना । अस्य सरलस्वभावतां, महोदारतां, चाऽनुभूय जनैरस्यनाम 'शिरोमणिमहाशय' इत्येव ख्यापितमासीत् । न्याय-दर्शन-भाष्यस्य काऽपि टीका विरचिता महाशयेनेति श्रूयते ।

अस्य शिष्या अपि ख्यातयशसो म० म० वामाचरणभट्टाचार्य, म० म० लक्ष्मणशास्त्रिद्राविडप्रमुखा बभूवुः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महामहोपाध्यायः, सी० आइ० ई० श्रीगङ्गाधर शास्त्री मानवल्ली

दक्षिण-देशान्तर्गत 'बंगलोर' नगरनिकटवर्ति 'यसरगद्दा' ग्रामात् आंध्रब्राह्मणः श्रीनृसिंहशास्त्री पद्भ्यामेव काशीमुपाययौ। अयं पण्डितवर्यः शास्त्रेषु निष्णातः काव्य-कला-धुरन्धर एवासीत्। अतएव तात्कालिक-काशिराजेन, श्रीमदीश्वरीनारायणसिंहभूपतिना ससंमानं स्वसभायामवस्थापितः। एतस्यैव प्रथमस्तनयः सुगृहीतनामधेयः श्रीगङ्गाधरशास्त्री बभूव। १९१० वैक्रमाब्दे गङ्गादशहरापर्वणि प्रादुर्भूतः शास्त्रिवर्यो 'गङ्गाधर' नाम्नैवाहूतोऽभूत्। अयमष्टहायनानन्तर एव पितुः शिक्षया पञ्चकाव्येषु, कोषव्याकरणादौ, विस्मयावहां व्युत्पत्तिमासादितवान्।

अथ पित्रा विधिवदुपनीतो गुरोः सकाशात्साङ्गोपाङ्गां कृष्णयजुर्वेदापस्तम्बशाखां वैदिककर्मकाण्डं, पितुः काव्य-साहित्य-विद्यां च सरहस्यामधीत्य तत्र षोडशवर्षवयाः पटिष्ठः समपद्यत।

अथ पितुरादेशेन काशिक-राजकीय-संस्कृत-विद्यालयाध्यापकं, तात्कालिक-विद्वन्मूर्धन्यं पाणिन्यपरावतारं श्रीराजारामशास्त्रिणं गुरुभावेनोपगम्य, पात्रे विद्या-निक्षेपं सहर्षं विदधतः परमसन्तुष्टादस्मात् सपरिष्कारं व्याकरणं, धर्मशास्त्रम्, सांख्य-योग-वेदान्तमीमांसाप्रभृतीनि दर्शनानि, लीलयैव जग्राह शास्त्रिवर्य्यः।

अथ कियता कालेन गुरुवरे संन्यस्य शिव-सायुज्यमुपेयुषि, अवशिष्ट-शब्दखण्डादिविषयाऽधिजिगमिषया प्रेर्यमाणोऽयं बालसरस्वतीति प्रथिताऽभिधानमशेष-विद्वद्वृन्द-समर्चितचरणं, भारत-वर्षाभरणं, रानडोपनामकं श्रीबालशास्त्रिमहानुभावं द्वितीय-गुरुभावेनाऽऽसेव्य, संतुष्टान्तरङ्गात्ततो दुरूहाणि शास्त्ररहस्याण्यासाद्य समधिकं दिदीपे। प्रतिभा-विस्मयाक्रान्तान् विदुषो विरचयन्, नव्य-भव्य, काव्यनिर्माणकलया सहृदयमनांसि रञ्जयन्, धर्मशास्त्र-व्यवस्थापत्राणि वितरन् निनाय शास्त्रिवर्यः स्वीयं कालम्। १८७७ ईसवीयाब्दे विजयिनीदेव्या राज्यारोहणप्रसङ्गे सर्वैरनुरुद्धः शास्त्रिवर्य्यः 'शाश्वतधर्मदीपिका' नामकमेकं स्मारकं ग्रन्थमरीरचत्। १८७९ ईसवीयाब्दे शास्त्रिवर्य-गुणाकृष्टः का० रा० महाविद्यालयाध्यक्षो डॉ० थिबोमहोदयः साहित्यदर्शनाध्यापकपदे न्ययूयुजदमुम्। अत्रान्तरे भारत-मार्तण्डः, शतावधानी, श्रीगट्टूलालमहोदयः काशीमुपेत्य विलक्षण-स्वीय-पाण्डित्य-प्रभावितवान् पण्डितान् वितन्वन्नुवास। शास्त्रार्थसभायां शास्त्रिवरेण दर्शन-विचारे, कवित्व-चमत्कारे, च तथा समाहितः श्रीगट्टूलालो, यथा स्वयमपि प्रशशंस शास्त्रिवरपाण्डित्यं, काश्याः प्रतिनिवृत्तश्च। ततश्च आसेतुहिमाचलं सुयशः प्रसृतं शास्त्रिवरस्य। काशीनिवासव्यसनिना शास्त्रिवरेण कलिकातासंस्कृतविद्यालयस्य बहुलवेतनाऽपि अध्यापक-पद-प्राप्तिः प्रत्याख्याता। शास्त्रिवरेण पूर्ववर्णितस्य स्वगुरुद्वयस्य चरितं चम्पूकाव्य-सरण्या निर्माय मुद्रापितम्। बहवश्च शास्त्रीया ग्रन्थाः संशोधनपूर्वकं सम्पादिताः शास्त्रिवरेण। १८८७ ईसवीयाब्दे सम्राड्या 'महामहोपाध्याय' पदं प्रदाय संमानितः श्रीगङ्गाधरशास्त्री। काशिक रा० सं० महा-विद्यालयाध्यक्षो डॉ वेनिसमहोदयः शास्त्रिवरे नितान्तं बद्धश्रद्धः, तत्सविधे शास्त्राण्यधीयानः, 'गुरुजी' इति पदेनैव सादरं निर्दिशतिस्म शास्त्रिवरम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महामहोपाध्याय पं० गंगाधर शास्त्री, सी० आई० ई०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्रान्तरे श्री सदाशिवदीक्षितस्य, आचार्यशिरोमणेश्च, ज्योतिष्टोमप्रमुखाः श्रौता यागाः शास्त्रिवरस्य कुशाग्रबुद्धिसाहाय्येन श्रौत-विद्या पाण्डित्येन, प्रबन्ध-पाटवेन, च संपन्नाः। ये खलु तस्मिन्नपि काले दुष्करा एवाऽऽसन्। एवं वैदिक-विद्योज्जीवने, महदिदं श्रेयः शास्त्रिवरस्यैवाऽस्ति। १९०३ खीस्ताब्दे सी० आई० ई० पदेन विभूषितः शास्त्रिवरः सम्राजा सप्तम-एडवर्डेन। १९०४ खीस्ताब्दे ज्येष्ठसुतनिधनेन दूनः श्रीमान् शास्त्रिवरोऽवकाशमादाय तीर्थयात्राञ्चकार। प्रतिनिवृत्तोऽसौ महात्मा 'अलिविलासिसंलाप'नामकं द्वादश-दर्शनीसारभूतमेकं खण्डकाव्यं, 'हंसाष्टक'ञ्च व्यरीरचत्। प्रयाग-विश्व-विद्यालये 'फेलो' पदे नियुक्तः शास्त्रिवरः। १९०९ खीस्ताब्दे म० म० श्री गङ्गानाथ-झा-महोदयस्य 'डाक्टर'परीक्षायाः परीक्षक आसीत् शास्त्रिवर्य्यः। १९७० विक्रमाब्दे ज्येष्ठ-शुक्ल-प्रतिपदि वीतरागः शास्त्रिवरो विदेहशिवभावमनुप्रविवेश। असंख्या दिगन्तकीर्त्तयो पं० रामावतार शर्म्म, गोस्वामि-दामोदर लाल शास्त्रि, नित्यानन्दपन्त प्रमुखाः शास्त्रिवरस्य शिष्या अभूवन्।

यथाक्रमं शास्त्रिवरानुजौ, म० म० श्रीरामशास्त्रि, म० म० श्री लक्ष्मणशास्त्रिणौ काशिकाया गौरव-स्तम्भौ, अभूताम्। शास्त्रिवरतनूजः श्रीभालचन्द्रशास्त्री का० रा० महाविद्यालयात् गृहीतावकाशः काशिक-विद्वन्मान्यो विद्योतते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महामहोपाध्यायः श्रीशिवकुमारमिश्रमहोदयः

अस्य पण्डितप्रकाण्डस्य जन्म काश्या निकटवर्तिनि 'उन्दी' नामकग्रामे १९०४ वैक्रमाब्दे फाल्गुन-कृष्णैकादश्यामजायत। 'मोतीरानी'तिमाता, पिता च रामसेवकमिश्रोनाम धार्मिकप्रवरोऽस्याऽभवत्। जन्मकाले महानुभावस्यास्य जिह्वायां श्वेत-त्रिशूलचिन्हं, भाले च चन्द्रखण्डाकारश्च कश्चिद्दृश्यत, तेन समीपवर्ती स्त्रीजनो 'राक्षसोऽयं परित्याज्य' इतिकोलाहलं चकार। जनकस्तु तद्दृष्ट्वा स्वगुर्वादेशमनुस्मरन् 'भविता महानुभावोऽयंबालः' इति संशयं दूरीकृत्य तासां, यथाविधि बालमेनं पुपोष। पञ्चमवर्षात्प्रभृत्येव बालोऽयमेकान्ते सरस्तटं गत्वा पार्थिव-शिव-पूजनमेव स्वक्रीडारूपेण तनोति स्म। नवमे हायने स्वपितृव्येन साकं 'बेतिया'नगरं प्राप्तोऽयं तत्र वाणीदत्तचतुर्वेदमहोदयात् लघुकौमुदीमध्येतुमुपचक्रमे। कियता कालेन गृहं प्रत्यावृत्तोऽयं महाभागो मातृ-पितृविहीनः पितृव्यादिभिर्गोमहिषादिचारणे नियुक्तोऽपि क्वचित् शिवपूजनेन, क्वचिदेकान्ते यथोपलब्ध-पुस्तकवाचनेन समयं निनाय। एकदा क्वचिद् गृहकोणे नितान्तं पुस्तक-वाचनैकतानोऽयं पितृव्येण नितान्तं निर्भर्त्सितो ग्लानिमनुभवन् तस्यामेव रात्रौ प्रस्थाय काशीपुरीमेव शरणीचकार।

काशीमुपेत्य रा० सं० महाविद्यालये दुर्गादत्तशास्त्रिभ्यो व्याकरणशास्त्रं, श्रीकालीप्रसादशिरोमणिभ्यो न्यायशास्त्रं, श्रीगणेशश्रौतिभ्यः खण्डनखण्डखाद्यं, श्रीविशुद्धानन्दस्वामिपादेभ्यो विविधानि दर्शनानि च सम्यगधीत्य पण्डितः संपन्नोऽयं महानुभावः। तत्राऽपि विशिष्टपाण्डित्यसम्पादनाय तत्कालिक-विद्वच्चक्रवर्तिनं श्रीबालशास्त्रिमहोदयं गुरुभावेन सम्यगाराध्य, परां पाण्डित्य-प्रकर्षकाष्ठामध्यतिष्ठदसौ बुधश्रेष्ठः। शास्त्रार्थेषु, ग्रन्थलेखने, काव्यनिर्माणे सद्यः समुचितव्यवस्थानिर्माणे, छात्राणामध्यापने च लोकोत्तरा प्रतिभा, तन्मूलकं दिगन्तगामि सुयशश्च प्रासरत् शास्त्रिवरस्य। बहवोऽन्तेवासिनः प्रकृष्टं पाडित्यं लम्भिताः स्वगुरोर्यशः ख्यापयन्ति। कियन्तंचित् कालं का० रा० सं० महाविद्यालये सम्यगध्यापनं चकार मिश्रमहोदयः। परन्तु पश्चात् केनाऽपि हेतुना तत्पदं परित्यक्तमेतेन महानुभावेन। सम्राजा, 'महामहोपाध्याय'पदेन, विद्वन्मण्डल्या 'पण्डितसम्राट्'पदेन च व्यभूषि पण्डितकुलगुरुरयम्।

कदाचित् 'दरभङ्गा'नरेशेन सबहुमानमाहूतः सभायां सत्कृतश्च महाभागोऽयम्। एतदीय-पाण्डित्य-प्रतिभा-प्रकर्षं विलोक्य समुपजाताऽऽदरभरो द्वारवङ्गेशः स्वपाठशाला-प्रधानाध्यापकपदे सादरमिमं न्ययुङ्क्त। अथाऽस्य काशीवासलालसामुद्वीक्ष्य काशीस्थदरभङ्गापाठशालाध्यापकपद एवाऽस्थापयत् भूपतिरमुम्।

इत्थमसौ महाभागः पाण्डित्य-मर्यादामनुपालयन्, सुरसरस्वतीं समुन्नमयन्, बहुविधान् शिष्यान् सम्पादयन्, यतीन्द्रचरित-लक्ष्मीश्वरप्रताप-परिभाषेन्दुशेखर-टीका प्रभृतीनि ग्रन्थरत्नानि विरचयन्, कदाचित् पक्षाघातव्याधिनाऽऽक्रान्तः केदारघट्टस्थताहिरपुरनरेशभवने वर्तमानो भगवत्स्मरणैकतानः १९७५ वैक्रमाब्दे पाञ्चभौतिकं वपुर्विहाय शिव-सायुज्यमवाप। एतत्तनयः श्रीवाचस्पतिमिश्रः प्रवया अधुनाऽपि विराजते। एतस्य दौहित्राः श्रीकमलापति-त्रिपाठि श्रीकरुणापति-त्रिपाठि प्रभृतयः सुविख्याता विराजन्ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महामहोपाध्याय पं० शिवकुमार शास्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूक्ति-शुभाशंसनम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महोत्सवः

१

भरत-भू-तिलकायित काशिका-सुरगवी-सदनं जयतात् चिरम् ।
महित-पन्त-सभापति-सन्निधौ व्यलसदस्य सुखेन महोत्सवः ॥

२

हरित-तोरण-पल्लवमालिका-कुसुम-दाम-निकाम-मनोहरः ।
सकल-भूतल-सूरि-समर्चितः सुरगिरां निलयोऽयमशोभत ॥

३

गोविन्दवल्लभ-नरेन्द्र मुखाऽतिविज्ञ-सौहार्द-हार्द-समुदित्वरसौभगश्रीः ।
कुन्देदु-शीतगिरि-हार-निभं यशः स्वं विद्यालयो मलयजोपमितं बिभर्त्तु ॥

वटुकनाथ शास्त्री खिस्ते

काशिक-राजकीय-विद्यालय-कविसम्मेलनार्थम्

अनेककविराजितं लसदनेकवर्णाकुलं सदागमरतद्विजध्वनिविगीतसौन्दर्यकम् ।
हिमालयविराजितप्रकृतिकान्तपृथ्वीयुतं गमागमविलोभितञ्जयति भारतं भारतम् ॥१॥
गोविन्दवल्लभतया श्रुतिभिर्विगीतो श्रीचन्द्रभानुकृपयाप्तसदर्तुसत्तः ।
स्वातन्त्र्यभावविकसत्सुसरोजिनीको प्रान्तः सदा विजयते किलयुक्तपूर्वः ॥२॥
नारायणाङ्घ्रिसरसीरुहलब्धशोभा, गोपालपालिततनुः शिवदत्तमूर्तिः ।
माद्यन्मुकुन्दमुरलीगतगीतगीतिः, गंगाथवा जयति काशिकपाठशाला ॥३॥
अद्वैतवादविलसत्सम्पूर्णानन्दरूपिणी, जीयात्सा भारती वाणी याद्यापि रमणीयते ॥४॥
आर्यापूजितपादं स्वतन्त्रतावर्ण्यमानगुणम्, ईर्ष्याऽसूयाशून्यं भूयान्मे भारतं नित्यम् ॥५॥

हरिदत्तशास्त्री साहित्याचार्यः

श्री काशिक-राजकीयसंस्कृतमहाविद्यालयः ।

श्रीगङ्गाधरसद्विभूतिलसितो दामोदरोद्भासितो नीचोच्चैर्विलसत्सुधाकरकलः श्लिष्यत्सुवर्णोज्ज्वलः ॥
उन्मीलद्वसुधासुधाशनकुलस्तुङ्गोत्तमाङ्गोऽपरो मेरुः काशिक-राजसंस्कृतमहाविद्यालयो द्योतते ॥१॥
उद्गायन्निगमागमध्वनिमिषेणोद्धूयमानध्वजव्याजेनोद्यतवाहनोत्पथजुषामुद्वेजनं नाटयन् ॥
मध्ये भारतरङ्गमञ्चमनिशं नेपथ्यनित्योज्ज्वलश्रीमत्काशिक-राज संस्कृत महाविद्यालयो नृत्यति ॥२॥
उच्चैरुदञ्चति पुरारिपुरे विशाला शैलाङ्गसङ्गि नृप संस्कृतपाठशाला ॥
कालाद्वहोरखिलभारतभव्यभूमी भालावतंसि सुमनोमयमञ्जुमाला ॥३॥

श्री भूपनारायण झा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उपाधि-वितरणोत्सवांगभूतोत्सवानां विवरणम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्यायशास्त्रार्थप्रतियोगितायां पक्षप्रतिपक्षप्रवाहः

प्रतियोगितात्वं धर्मावच्छेद्यत्वव्याप्यं न वा ?

पूर्वपक्षी काशिक-राजकीयसंस्कृत-महाविद्यालयीयः स्वामी काशिकानन्दः

उत्तरपक्षी राजकीय-संस्कृत-महाविद्यालयीयो नारायण शास्त्री द्राविड़ः

पू०—प्रतियोगितायां धर्मावच्छेद्यत्वानङ्गीकारेऽभावप्रत्ययो हि विशिष्टवैशिष्ट्यावगाहिबोधमर्यादाभाति शेते इति नियमविरोधापत्तिः स्यादतो धर्मावच्छेद्यत्वमङ्गीकार्य्यमन्यथा घटवत्यपि घटो नास्तीति प्रत्ययापत्तेः ।

उ०—प्रतियोगितायां धर्मावच्छेद्यत्वाङ्गीकारेऽपि उभयाभावादिकमादाय घटवति घटो नास्तीति प्रत्ययापत्ति तादवस्थ्यमिति तद्वारणाय घटत्वेतरधर्मावच्छिन्न घटत्वावच्छिन्न प्रतियोगिताकाभाव इत्यादिरीत्या निवेशेऽनवस्था स्यादतो घटो नास्तीति प्रतीतिसिद्धोऽभाव एव घटाभावो वक्तव्यस्तथा च धर्मावच्छेद्यत्वे न किमपि मानम्

पू०—प्रतियोगितायां सम्बन्धावच्छिन्नत्वं प्रतिबंध्यप्रतिबन्धकभावानुरोधेनावश्यमङ्गीकार्य्यमन्यथा समवाय-संसर्गेण घटवत्ताबुद्धौ संयोगेन घटाभाववत्तानिश्चयस्य विरोधित्वापत्तेरित्यञ्च संसर्गस्यापि वृत्तिमत्वरूपधर्मलक्षणा-क्रान्ततया धर्मावच्छेद्यत्वसिद्धिः

उ०—तथापि अत्यन्तान्योन्याभावीयप्रतियोगितायां संसर्गावच्छेद्यत्वेन धर्मावच्छेद्यत्वसिद्धावपि घटो नष्ट इत्यादि प्रतीतेर्घटनिष्ठप्रतियोगिताकाभावावगाहितयैवोपपत्तौ ध्वंसप्रागभावीयप्रतियोगितायां संसर्गावच्छेद्यत्वे प्रमाणविरहात् प्रतियोगितात्वे धर्मावच्छेद्यत्वव्याप्यत्वं नास्तीति

पू०—ध्वंसीयप्रतियोगिताया उत्तरकालसंसर्गावच्छिन्नत्वेन एवं प्रागभावीय प्रतियोगितायाः पूर्वकाल संसर्गावच्छिन्नत्वेन प्रतियोगितात्वस्य धर्मावच्छेद्यत्वव्याप्यत्वसिद्धिः

उ०—ध्वंसप्रागभावप्रतियोगिने पक्षीकृता संसर्गावच्छेद्यत्वसाधने किमपि साधनं वक्तव्यम्

पू०—ध्वंसप्रागभावप्रतियोगिने उत्तरपूर्वकालसंसर्गावच्छिन्ने संसर्गाभावीयप्रतियोगितात्वात् यद्वा—

ध्वंसप्रागभावौ संसर्गावच्छिन्नप्रतियोगिताकौ संसर्गाभावत्वात् संसर्गाभावत्वं च तादात्म्यप्रतियोगितावच्छेदक-संसर्गेण प्रतियोग्यारोपस्तज्जन्यप्रतीतिविषयत्वेसत्यभावत्वम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरणशास्त्रार्थप्रतियोगितायां पक्षप्रतिपक्षप्रवाहः ।

अर्थवत्सूत्रेऽर्थवत्त्वं प्राचीनाभिमतं नवीनाभिमतं वोपपत्तिसहमितिविप्रतिपत्ति-- विषयः ।

पूर्व पक्षी—ईश्वरदत्तद्विवेदी ।

उत्तर पक्षी—वासुदेव प्रसाद द्विवेदी ।

पूर्व पक्षः—अर्थवत्पदयौगिकत्वरक्षणार्थमर्थविषयकबोधजनकत्वरूपमेवार्थवत्त्वं ग्रहणमर्हति ।

उत्तर पक्षः—पूर्वोत्तरसूत्रयोरर्थवत्पदजन्यभिन्नभिन्नार्थवत्त्वविषयकोपस्थित्योः शाब्दबोधजनकतायां गौरवादेतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वरूपमेकविधमेव पारिभाषिकार्थवत्त्वमुभयंत्रापि ग्रहणमर्हति, इतरथा पर्युदासन्यायेनैव यौगिकार्थवत्त्वलाभसम्भवेनार्थवद्ग्रहणवैयर्थ्यमापद्येत ।

पू० प०—तद्ग्रहणं व्यर्थं सत्पर्युदासन्यायानित्यत्वं ज्ञापयति,

उ० प०—तदनित्यत्वे किं फलम् ?

ततस्तत्समाधानाशक्ततयोत्थितस्यौक्तपूर्वपक्षिणः पदं चन्द्रिकाप्रसादद्विवेदी अध्यासिष्ट ।

पू० प०—अनर्थकनिपातानां प्रातिपदिकत्वमेव तदनित्यत्वफलम् ।

उ० प०—उत्तरसूत्रस्थ चशब्देन तेषां संग्रहेण तत्फलाभावात् ।

पू० प०—उत्तरसूत्रेऽनुवृत्त्यर्थमेवार्थवद्ग्रहणम् ।

उ० प०—तथापि पञ्चनावप्रियशब्दै पञ्चनावेत्यस्य तेन प्रातिपदिकत्वाट्टबापद्यते ।

पू० प०—उत्तरसूत्रे एकार्थीभावेन लौकिकप्रयोगे प्रसिद्धत्वरूपार्थवत्त्वस्यैव ग्रहणेन तस्य तत्राभावः ।

उ० प०—तदेवतु गौरवम्.

पू० प०—तवापि किन्न गौरवम् ?

उ० प०—उभयत्रैकविधस्यैव तस्याङ्गीकारेण मम किं गौरवम्, प्रत्युत प्रत्ययपर्युदासाकरणेन महल्लाघवमेव ।

पू० प०—तर्हि राज्ञः पुरुषइत्यत्र सुरहितस्य प्रातिपदिकत्वापत्तिः ।

उ० प०—एतत्संज्ञेत्यत्र षष्ठीसमासाभ्युपगमेनादोषात् ।

पू० प०—रमेन्द्राणीत्यादौ रमेन्द्रशब्दयोरर्थवत्त्वानुपपत्तिः ।

उ० प०—एतत्संज्ञाफलभूतमनिवेश्य तत्स्थाने एतन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वनिवेशेनादोषः ।

पू० प०—भवदभिमतार्थवत्त्वस्य एतत्त्वघटितत्वेनाननुगतत्वम्.

उ० प०—शब्दविशिष्टत्वेनानुगमः ।

पू० प०—नह्यवयवापर्याप्तन्यायेन रामशब्दघटकरेफादावर्थवत्त्वापत्तिः

उ० प०—तर्हि तेन न्यायेन त्र्यणुकाप्रत्यक्षत्वापत्तिः

पू० प०—रथदृष्टान्तेन तत्परिहारः ।

उ० प०—तद्दृष्टान्तेनैव तत्परिहारः ।

अत्र निर्णयः

यद्यप्यत्रोत्तरपक्षी वासुदेव प्र० द्विवेदी विजेतृत्वात्पारितोषिकमर्हति, तथापि विशिष्टवक्तृत्वात्पूर्वपक्षी चन्द्रिका प्र० द्विवेद्यपि द्वितीयसम्मानार्ह इति सभापति शर्मोपाध्यायः सभापतिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सतीर्थ्य-सम्मेलनम्

जनवरीमासस्य दशमदिवसे भूयसामत्रत्यानामन्यत्रत्यानाञ्च विदुषां छात्राणाञ्चोपस्थितौ वाराणसेय-हिन्दूविश्वविद्यालयान्तर्गतसंस्कृतमहाविद्यालयाव्यकरणाध्यापकानां पं० श्रीमदम्बिकाप्रसादोपाध्यायमहोदयानां साभापत्ये का० रा० सं० महाविद्यालयव्याकरणाध्यापकानां पं० श्रीगोपालशास्त्रिनेने महोदयानां संयोजकत्वे च सतीर्थ्यसम्मेलनं (का० रा० सं० म० वि० प्राचीनस्नातकसम्मेलनं) समपादि। तत्र इन्दौर-राजकीयसंस्कृतमहाविद्यालयाध्यापकैः श्रीविनायकशास्त्रिभिस्तत्सम्मेलनस्य महत्वं व्याख्यायि। बहुभिश्च विद्वद्भिः स्वस्वविचारानुसारेण सतीर्थ्यपदंव्याख्यातम्। का० रा० सं० म० विद्यालयीय परीक्षाध्यक्षैः श्री कुबेरनाथ शुक्लमहोदयैश्च तत्सम्मेलनोद्देश्यं वैशद्येन प्रत्यपादि अन्ते तस्य सम्मेलनस्य कृतेद्रव्यसाहाय्यं संगृहीतमभूत्।

निम्नलिखितस्थायिपदाधिकारिणश्च निर्वाचिता अभूवन्
सभापतिपदे पं० श्रीमदम्बिकाप्रसादोपाध्यायमहोदयाः।
मन्त्रिपदे पं० श्री गोपालशास्त्रिनेनेमहोदयाः।
उपमन्त्रिपदे पं० श्री भूपनारायणझामहोदयाः।
कोषाध्यक्षपदे पं० श्री मुरलीधरोपाध्यायमहोदयाः।

अभिनय-विवरणम्

संस्कृतनाटकानि अनभिनेयानीति अर्वाचीनः प्रवादः। अद्यत्वे जाग्रति शौर्ये भारतीय-सारस्वतानां कृते इदमाह्वानम्। तमेव प्रयोगेण धर्षयितुं अभिनयस्यायं सभारम्भः गताधिवेशने एवासीत्। परमसौ विश्ववन्द्यस्य महात्मनो गान्धिनः महापरिनिर्वाण महाशोके मग्नः। निर्भिन्ने तस्मिन् महातमसि, प्रवर्तमानेऽधिवेशने अयमारम्भः सम्पन्नः। अस्मिन् महाकविभासकृत 'कर्णभार' 'दूतघटोत्कचौ' मृच्छकटिकस्य सन्धि-भेददृश्यं च रङ्गभूमौ तथा अभिनीतं यथा सामाजिकैः भृशं अभिनन्दितम्। तत्र नान्दीपाठे दृश्ययोरन्तराले च समनुष्ठितं गीतं भारतीयसंगीतपरम्परानुकारित्वात् अतीव मनोहारि सञ्जातम्।

सामाजिकेषु प्रान्तीयशिक्षाविभागस्य गण्यतमा अधिकारिण अन्ये च काशीस्था सहृदय-हृदयाः कलाविदो विद्वांसः, प्रयोगपरायणाश्च रसिका आसन्। अन्ते शिक्षामात्याः श्रीसम्पूर्णानन्दमहोदयाः अस्य सफलाभिनयस्य कृते भूरिशः प्रशस्तीः शुभञ्च कामयमानाः शर्विलकाय, कर्णाय, दुर्योधनाय एकैक राजतपदकप्रदानेन समुत्साहितवन्तः। तथा च रसमर्मज्ञाः म० म० नारायणशास्त्रिखिस्ते महोदया अपि धृतराष्ट्राय पदकमेकं दत्तवन्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरणदर्शनभूमिकाया अवभासः

अनुसन्धान-विभागात्प्रकाशितः बिहारप्रान्तीयशिक्षा-विभागतः गृहीतावकाश श्री रामाज्ञापाण्डेयस्य लेखः ।

श्रीमते रामानुजाय नमः

बुद्धिं योऽष्टगुणां ददाति सदयं भक्ताय सक्तात्मने
तत्प्राप्त्या चिदचिद्विभागमहितं विश्वं समुद्भासते ॥
योऽन्तःस्थो बहिरेत्य योगकलया तत्त्वान्तरङ्गत्रयं
दत्त्वा पूतमनस्कृतां वितनुतां नारायणः सोऽचिरात् ॥१॥
यावत् त्वां भजते जनो मधुरिपो तावत् स भक्तो भवेत्,
त्वं भक्तुं यतसे यदा करुणया भक्तस्तदा सोच्यते ।
स्वीयोक्तिं द्रढयन् दयस्व भगवन् दीनस्य हीनस्य मे,
याचे नाथ पतंस्त्वदाङ्घ्रिकमले मां तादृशं त्वं कुरु ॥ २ ॥
एतद्व्याकृतिदर्शनं त्वमदिशः कर्तुं जनं तावकं,
क्षिप्रं तस्य कुरुष्व पूर्तिमधुना धुन्वन्नघानां ततीः ।
यद् दृष्टं मुनिभी रहस्यसहितं दाक्षीसुताद्यैः पुरा,
तन्मत्संविदि दीव्यतादनुलवं नान्यं त्वदन्यं श्रये ॥ ३ ॥

अथाहमत्र व्याकरणदर्शनोपस्थापनात् पूर्वम् अस्मदीयैर्बहुभिः सुहृद्भिः 'त्वं किं करोषि सरस्वतीभवन' इत्यनुयुक्तस्तत्प्रस्तावरूपेण तद्दर्शनांशमात्रं किञ्चिद् भवतां पुरस्तादुपस्थापयामि ।

मया चिरसेवितस्य व्याकरणदर्शनस्य द्विविधो विकास आभ्यन्तरो बाह्यश्चेति । तत्र प्रथमं बाह्यमनुपन्यस्य आभ्यन्तरमेव दर्शयामि ।

अथ पूर्वमव्याकृतायाः शब्दार्थोभयात्मकविभागरहितायाः स्वतन्त्रायाः कर्त्रीपदवाच्यायाः पराया वाचः स्पन्दे व्याकृता व्याकरणपदवाच्या प्रणवात्मिका वेदापरपर्याया स्फोटाभिधेया शब्दप्रधाना पश्यन्ती अर्थप्राधान्य प्रतिभा वा स्फुटिताऽभवत् ।

तस्या एवेषदवभासं समाधवुपलभ्य व्युत्थितावस्थायां भगवान् पाणिनिः, आज्ञाचक्रस्थमहेश्वरस्मृत्या तत्पूर्वभाविषु व्याकरणेषु त्रुटिमाकलय्य ग्रन्थादावुपन्यस्तव्यमक्षरसमाम्नायं ग्रथिष्यमाणग्रन्थे लाघवसम्पत्त्यै वर्णक्रमं व्यत्यस्य हकारं चाम्रेड्य तत्रान्याननुबन्धांश्चासज्य चतुर्दशसूत्रीं समुदभावयत् ।

एवं वर्णपाठे सति अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामनुपदेशाद् दोषमाशङ्क्य भगवान् कात्यायनोऽयोगवाहानामट्सु शर्षु चोपदेशं कर्तव्यत्वेन प्रत्यपादयत् । तत्राप्यकारानन्तरमेवाट्सुपदेशः कर्तव्य इत्यसूचयच्च । अन्यथा पयःसु यशःसु इत्यत्र 'इण्कोर्' इत्यधिकृत्य विधीयमानम् 'आदेशप्रत्यययोर्' इति षत्वं दुर्वारं स्यात् ।

ऋलृक्सूत्रे वार्त्तिककारस्य लृकारप्रत्याख्यानं तु सूत्रभेदेन गौरवग्रस्तमिति भाष्यकारोऽदूषयत् ।

लण्सूत्रोपरि भगवता कात्यायनेन न किञ्चिद् वार्त्तिकमुपन्यस्तम्, किन्तु भगवान् पतञ्जलिर्णकारस्य पुनरनुबन्धत्वेन ग्रहणाद् 'व्याख्यानत' इति परिभाषाऽभीष्टा पाणिनेरित्यसूचयत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'ञमङणनम्, झभञ्' इति सूत्रयोरपि वार्त्तिककारो मौनमेवावालम्बत । भगवान् भाष्यकारस्तु मकारमनुबन्धं व्यञ्जनया प्रत्याचख्यौ ।

तथा चैतानि चतुर्दशसूत्राणि महेश्वरकृतानीति भाष्यपर्यालोचनया नायाति, किन्तु भगवता पाणिनिनैवोपन्यस्तानि ।

'कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्' इत्यनेन 'सिद्धे शब्दार्थसम्बन्धे' इति वार्त्तिकावतरणेन, प्रत्याहारसूत्रस्थवार्त्तिकव्रातेन च स्पष्टं प्रतीयते यद् अक्षराणामेतादृशः क्रमः पाणिन्युपज्ञमेव । 'वृत्तिसमवायार्थो वर्णानामुपदेशः' इति वार्त्तिकोक्त्या च वर्णानां क्रमेणैतादृशः सन्निवेशो भगवता पाणिनिनैव कृत इति सिध्यति । नहि केवलं स्वरूपज्ञापनार्थमेव वर्णानामत्रोपन्यासः किन्तु कृत्स्नस्याप्यस्य शास्त्रस्य साधनतयाऽत्रोपादानमिति भाष्यपर्यालोचनया प्रतीयते । हकारस्य द्विधा सन्निवेशो न हि स्वरूपावबोधार्थं किन्तु शास्त्राणां तत्तल्लक्ष्येषु प्रवृत्त्यर्थमेव। न हि हल् सूत्रं प्रत्याख्याय साम्प्रतिक्याऽष्टाध्याय्या लक्ष्याणि व्याकर्तुं शक्यन्ते।

'वृद्धिरादैच्' इत्यत्र 'वृद्धिशब्दमादितः प्रयुङ्क्ते' इति भाष्योक्त्या पाणिनेर्ग्रन्थप्रवृत्तिरित एवेति केचन प्रत्यवतिष्ठन्ते, तन्न । अष्टाध्याय्या आरम्भस्तदारभ्येत्यनया रीत्या तद्गतेः समर्थनात्, बहुभिर्वक्ष्यमाणैः प्रोक्तैश्च प्रमाणैस्तेन क्रमेण सूत्रोपन्यासस्य पाणिनिकृतत्वस्य सिद्धत्वात् पूर्वोक्तया युक्त्या तद्बाधस्य दुष्करत्वात् ।

'ञमङणनम्' इत्यत्र मकारप्रत्याख्यानम् अणि ईषत्स्पृष्टयोर् ऋकार-ऌकारयोरुपदेशस्य कर्तव्यता, अयोगवाहानां चोपसंख्यानमित्यादयस्त्रुटयः प्रत्याहारसूत्राणि अमाहेश्वराणीति सूचयन्ति । न हि महेश्वरकृतावेतादृश्यस्त्रुटयः संभाव्यन्ते । प्रत्याहारसूत्राणां शिलान्यासरूपत्वात्तेषां प्रथममुपन्यासस्तदनन्तरं च विशिष्ट ग्रन्थारम्भः सूत्ररूपेण । नत्र वृद्धिशब्दम् आदितः प्रयुत इत्यत्र आदित इत्यस्य प्रथममित्यर्थकत्वेन प्रत्याहारसूत्राणां पाणिनीयत्वे दोषाभावः । अत एव 'नहि दर्भपवित्रपाणिताद्यपरं मङ्गलमत्र कीर्त्यते' इति हरदत्तेनोक्तम् । भाष्यकृता प्रत्याहारसूत्राणां कुत्रापि माहेश्वरत्वस्यानुक्तत्वाच्च पाणिनीयत्वमेव । एवमेवानुबन्धा माहेश्वरकृता इत्यपि निर्मूलमेव भाष्ये क्वापि तददर्शनात् ।

'सर्वस्य चाहं हृदि सन्निविष्ट' इति गीतोक्त्या तु माहेश्वराणीति कथयितुं शक्यते । परमेतस्मिन् पक्षे ऽष्टाध्याय्यपि महेश्वरकृताऽऽपद्येत ।

अत्र चतुर्दश सूत्रेषु किञ्चित् समालोच्यते :—

यद्यपि पाणिनेः पूर्वं वर्णक्रमो नैवंविध आसीदिति मया प्राक् सूचितम्, तथापि स्पष्टतया तस्योपन्यासोऽपेक्ष्यत इति किञ्चित् संक्षेपेण ब्रवीमि । प्रातिशाख्यादिपर्यालोचनया पञ्चानां वर्गाणां क्रमः कुचुटुसुपुरूपेणासीदिति नास्ति कोऽपि सन्देहस्तत्र । अत एव तुल्यास्यसूत्रे 'चुटुतुलशर्व्यवाये ने त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवाये नेति भाष्यकृतोक्तम् । तेषां पूर्वापरीभावे बीजं तूच्चारणस्थानस्यैव तथात्वं प्रतिभाति । तथाहि कण्ठतालुमूर्धदन्तोष्ठरूपाणां पञ्चानां स्थानानां क्रमिकतया विद्यमानत्वेन तेनैव क्रमेण पञ्चानां वर्गाणामुपन्यासः सर्वत्र समुपलभ्यते । तथैव स्वरेष्वपि स एव पन्था अवलम्बनीयः । एवं च अ इ ऋ ऌ उ इत्येवं क्रमो युक्तियुक्तः स्यात् । परं नेयं रीतिः स्वरविषये प्रातिशाख्यादिषु समुपलभ्यते ।

अत्रोच्यते वर्णानां सृष्टिक्रमे पितृस्थानीयाद् बिन्दोर्मातृस्थानीयस्य विसर्गस्याभिव्यक्तौ तस्यैव पञ्चसु कण्ठादिषु स्थानेषु हयरलवरूपेण परिणतौ तेष्वेवपरासां दशानां कचटतपगजडदबानां मातृकाणां प्रादुर्भावे 'अर्धमात्रा स्थिता नित्या याऽनुचार्य्या विशेषत' इति मार्कण्डेयपुराणोक्त्या अनुचार्य्याणां नित्यानां षोडशानां मातृकाणां वैखरीरूपेणाविर्भावार्थं हकाररूपा अर्धमात्रा मातृकासंवृतैव सती वर्धमाना एकमात्रा ऊष्मतां परित्यज्य अकाररूपं धत्ते । ता एव यरलवा अर्धमात्राश्चतस्रो मातृकाः संप्रसृताः सत्य इऋऌउरूपतां धारयन्ति । 'इग यणः संप्रसारणम्' इति सूत्रयन् भगवान् पाणिनिरिममर्थं परिपुष्णाति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदा च पालिभाषायां प्राकृतभाषायां च ऋलृवर्णयोरभावात् केवलं पञ्चानामेव अ इ उ ए ओ इत्येतेषां स्वराणामङ्गीकार आसीत्। तत्रैव रलाभ्यां समुद्भूतौ ऋकारलृकारश्च ऋलृरूपेण समुपन्यस्तौ। एवमेव सन्ध्यक्षररूपतामाप्तौ ऐकारौकारौ च ऐ औ रूपेण निर्दिष्टौ। अयमेव हेतुः प्रातिशाख्यादिष्वपि पूर्वेषु शास्त्रेषु स्वरवर्णोपन्यासे क्रमत्यागे प्रतीयते।

पाणिनिसूत्रेषु क्रमत्यागे बीजं तु तत्तत्प्रत्याहारेषु तत्तद्वर्णानां ग्रहणाग्रहणरूपमप्यवधेयम्।

तन्त्रशास्त्रे तु भिन्नः क्रमो निर्दिष्टोऽस्ति। विस्तारेणैतत् सर्वं मदीयेऽक्षरविज्ञाने द्रष्टव्यम्।

अत्रायं रहस्यार्थः—यदा हि बिन्दुर्द्विधा भूत्वा विसर्गरूपं धारयति तदा त्रिकोणरूपं सम्पद्यते। तथा च त्रिकोणस्याभ्यन्तरे द्वौ भागौ कल्पितौ। एकश्च बिन्दुरूपोऽपरश्च विसर्गात्मकः। तत्र विसर्गपरिणतिरूपेषु वर्गतृतीयेषु वर्णेषु संक्रान्तं बिन्दुरूपं शब्दब्रह्म पितृस्थानीयं पञ्चवर्णरूपमाविर्भावयति। त एव पञ्चमा वर्णाः स्वेभ्यः पूर्वेषु स्पर्शेषु सत्सु यमानाविष्कुर्वन्ति। स्वयं च बिन्दुः स्वरेभ्यः परोऽनुस्वाररूपेण तिष्ठति। अर्थाद् एक एव बिन्दुर्द्विधारः खड्ग इव स्वकीयमाभासं पूर्वत्र परत्र च संक्रमयति। परत्र संक्रमे पञ्चमान् वर्णाञ् जनयति पूर्वत्र च स्वाननुनासिकान् विधत्ते। क्वचिश्च कश्चन पञ्चमो वर्णः स्वकीयं घोषांशमानुनासिक्यांशं च यदा कारणवशाज्जहाति ऊष्मत्वं चात्मनि संस्थापयति तदा यस्तस्य बिन्दुंशस्स पूर्वत्र क्वचिदनुस्वाररूपेण तिष्ठति क्वचिच्चानुस्वाररूपमपि जहत् पूर्वस्थं स्वरमनुनासिकं विधत्ते। यथा तांस्तनोति ताँस्तनोतीत्यादौ।

एवं चायोगवाहेषु यमानुस्वाराः साक्षाद् बिन्दोर्विभूतयः विसर्गजिह्वामूलीयोपध्मानीयास्तु विसर्गविलसितानि सन्ति।

अक्षरसमाम्नाये तु पञ्चमा वर्णाः स्वराणां यवलानां चानुनासिक्यं बिन्दोः कार्याणि सन्ति। तद्भिन्नोऽक्षरसमाम्नायस्तु विसर्गस्य कृतिर्विद्यते।

एवमेव सन्धिविषये सृष्टिसन्धिः, स्थितिसन्धिः, संहारसन्धिश्चेति त्रिविधो विभागो जागर्त्ति।

आद्गुणः, वृद्धिरेचीत्यादीनि सृष्टिपदव्यपदेश्यानि विद्यन्ते। प्रकृतिभावस्तु स्थितिसन्धिपदाभिधेयोऽस्ति। 'इको यणचि' 'लोपः शाकल्यस्येत्यादीनि' संहारसन्धिपदवाच्यानि मन्तव्यानि। सन्धिदर्शनं मदीये व्याकरणदर्शने विशेषतो द्रष्टव्यम्।

अनयैव रीत्या षट् कारकाणि पाणिनिप्रभृतिभिराचार्यैः स्वीयव्याकरणकार्यसम्पत्त्यै साधितानि सन्ति। पाणिनेः पूर्वं तु इमानि षट् कारकाणि कारकपदव्यवहार्याणि नासन्।

तथाहि करोतीति कारकम्, करोतीति कर्तेति व्युत्पत्त्या कर्तृकारकशब्दौ समानार्थावेवाभिमतौ। अत एव यत् कारकं भवेत् तत्त्ववश्यमेव विवक्षया कर्ता स्यात्। यथा ओदनं पचति (=ओदनः स्वयमेव पच्यते) असिना छिनत्ति (=असिश्छिनत्ति) स्थाल्यां पचति (=स्थाली पचति) इमानि वास्तविकानि त्रीणि कारकाणि विवक्षाऽविवक्षाभ्यां कर्तृत्वमासादयन्ति। परमपादानसम्प्रदाने क्वापि कथमपि कर्तृत्वं न भजत। अपि च तयोर्नाम्नोर्नहि कृधातुरनुस्यूतोऽस्ति यथाऽन्येषु चतुर्षु कारकेषु। एतेनापि संप्रदानापादाने विजातीयत्वेनैव प्रतीते भवतः। केवलं प्रयोगमात्रसिद्धये भगवता पाणिनिना कारकत्वेनाभिमते स्तः।

यद्यपि शृङ्गात् शरो जायत इत्यत्रापादानत्वस्याविवक्षया शृङ्गं शरो जायत इत्यादावपादानं कर्तृत्वं लभते तथापि नहि शृङ्गं तत्र वस्तुतोऽपादानं किन्तु तदधिकरणमेव शृङ्गे शरो जायत इत्यर्थस्यैव तत्र प्रतीतेः।

स्थालीपुलाकन्यायेन मयाऽत्र किञ्चिदुपस्थापितम्। एतादृशा एव गूढा विषया व्याकरणदर्शने स्फोरिता भविष्यन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीयं वाङ्मुखम् ।

महानयं प्रमोदावसरः समेषां सुर-सरस्वती-सेवानुरागिणां यत्किल स्वातंत्र्य-ज्योतिषा समन्तादपसारिते मलीमसे दैन्ये, नैराश्ये, च पुनरपि वयं भगवत्याः सुरसरस्वत्याः यथापूर्वं ततोऽभ्यधिकां वा समुन्नतिं दिदृक्षामः । चिराय दुःस्वप्नसङ्कीर्णा तामसीव निराशामयी कालपरम्परा भगवदनुकम्पा-सम्पातादपगतैव ।

अत्र महात्मनो विश्व-विश्रुतचरितस्य त्यागस्तपश्च हेतू भवत इति विवेचयतः सचेतसः कस्य रोमाणि नोज्जृम्भन्ते ? नयने वा नीरेण न पूर्येते ?

गीर्वाण-वाणीमातृगृहायमाणोऽयं राजकीय-संस्कृत-महाविद्यालयश्चिरात् उन्नतशिरा भारतीय-संस्कृ-ते रैतिहासकः प्रहरीव राजते । अयमस्य तृतीयउपाधिवितरणोत्सवः संपन्नः । अमुं हायनमारभ्य महाविद्यालयस्य जीवने समुल्लेखनीयं परिवर्त्तनं समपद्यत । महामाननीयसंस्कृत-जीवातु-शिक्षामात्य-समुत्साहशक्त्या प्रेर्यमाणा वयं आत्मनि कामपि नवीनामेव स्फूर्तिमनुभवामः ।

प्रधानमन्त्रिमहोदयस्य शिक्षामन्त्रिमहाभागस्य, आचार्यनरेन्द्रदेवविदुषः, कुलपतेश्च भाषणेषु संस्कृत-क्षेत्रे यादृशं परिवर्तनं, समुन्नयनं, सफलीकरणं च सञ्जातं तद् व्यक्तीभविष्यति ।

अद्ययावत् परकीयैः शासकैः कामपि दिशं नीयमाना वयमनुगन्तार एव अभूम, अद्य वयं स्वभागधेयनिर्मातारः समुन्नति-सोपानारोहणे स्वतन्त्राश्चेति महदिदं परिवर्तनम् । महामान्यः प्रधान-मन्त्री श्री जवाहरलाल-नेहरू-महाभागोऽपि भारतस्य समुन्नतौ संस्कृत वाणिमेव प्रधान-हेतु पदमारोपयति, एवमन्येऽपि सर्वे सङ्गिरन्ते ।

विशेषतश्च—अस्माकं प्रान्तः सर्वाधिक-सौभाग्यभाक् वर्तते, यदीयः शिक्षा-सचिवः श्री सम्पूर्णानन्द-महाभागः संस्कृतभाषायाः शास्त्राणाञ्च स्वयं प्रौढः पण्डितः सततमेतेषां समुन्नतौबद्धपरिकरस्तिष्ठति । संस्कृताध्यायिनां समाजो भवतः सततमधमर्णः स्थास्यति, संस्कृत-वाङ्मयकृते हृदयेन भवता यद् व्यवस्यते, तत्कथामितिहास एव स्वर्णमयैरक्षरैरुद्घोषयिष्यति ।

भवदुत्साहप्रभावेणैव महाविद्यालयोऽयं विश्वविद्यालयो बुभूषति । विश्वविद्यालयात्मना भवतः कीर्तिराचन्द्रतारं स्थिरीभविष्यतीति नो विश्वासः । भवदुत्साहाल्लब्धया प्रेरणया, प्राचीन-विद्वत्कुलतल्लजस्य कुलपतिमहोदयस्य निर्देशेन च नवीनमेतद् विवरण-मुद्रणकार्यं साधु समपादि ।

पर्यन्ते च वयं सर्वेषामेतद्देशीयानां द्वीपान्तरस्थितानाञ्च शुभचिन्तकानां, संदेश-प्रेषकानां, विदुषां संस्कृतवाङ्मयगौरवादरव्यवसायं प्रशंसन्तः कृतज्ञतां प्रगटयामः । अन्येषाञ्च-उपाधि-वितरणोत्सव-विवरणे साहाय्यकृतवतां सहयोगिनां प्रयत्नमभिनन्दामः इति

उपसम्पादकौ—

श्री अलखनिरञ्जनपाण्डेयः साहित्याचार्यः, एम० ए०, बी० टी०

श्री बटुकनाथ शास्त्री खिस्ते साहित्याचार्यश्च ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परिशिष्टम्

द्वितीयोपाधिवितरणोत्सवस्य संक्षिप्तवर्णनम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

काशिकराजकीयसंस्कृतमहाविद्यालयस्य

अनुसन्धान-मन्दिरप्रारम्भोत्सवो द्वितीय उपाधिवितरणोत्सवश्च

ऐषमो जनवरीमासस्य त्रिंशे दिवसे (माघकृष्णञ्चम्यां शुक्रवासरे) मध्याह्नोत्तरं द्विवादनवेलायां श्रीमतां युक्तप्रान्तीयशिक्षासचिवानां माननीय-श्रीसम्पूर्णानन्दमहोदयानामाध्यक्ष्ये काशिक-राजकीय-संस्कृतमहाविद्यालयस्य अनुसन्धानमन्दिरप्रारम्भोत्सवो, द्वितीय उपाधिवितरणोत्सवश्च भविता। तत्र दीक्षान्तभाषणं म० म० पं० गिरिधरशर्मचतुर्वेदमहोदयैः करिष्यते। तदुत्सवाङ्गतया अधोलिखितानि सम्मेलनान्यप्यत्र महाविद्यालयसरस्वतीभवनेऽधोनिर्दिष्टकार्यक्रमानुसारं सम्पत्स्यन्ते।

श्रीमङ्गलदेवशास्त्री,
एम० ए०, डी० फ़िल० (ऑक्सन),
काशिकराजकीयसंस्कृतमहाविद्यालयाध्यक्षः

तिथिः १५।१।४८ ई०

१—संस्कृतभाषणप्रतियोगितासम्मेलनम्

समयः—२७।१।४८ दिवसे मध्याह्नोत्तरम् १ वादनात् ४ वादनं यावत्।

विषयः—हिन्दीसंस्कृतयोः कतरा भाषा राष्ट्रभाषा भवितुमर्हति।

सभापतिः—पं० रामाज्ञापाण्डेयः।

संयोजकौ—पं० अनन्तशास्त्री फड़के।
पं० जगन्नाथोपाध्यायः।

(१) क्वापि विद्यालयेऽधीयानाश्छात्रा एवात्र प्रवेष्टुमर्हन्ति। तेषां विषये तत्तद्विद्यालयाध्यक्षद्वारा २५।१।४८। दिवसात्प्रागेव 'प्रिन्सिपल, गवर्नमेन्ट-संस्कृतकालेज बनारस' सविधे तन्नाम-तद्गुरुनाम-तद्योग्यताप्रमापकपत्रागमनमावश्यकम्।

(२) पक्षद्वयेऽपि सर्वोत्कृष्टत्वेन निर्णीताय च्छात्राय राजतमेकं पदकं प्रदास्यते।

२—शास्त्रार्थप्रतियोगितासम्मेलनम्

व्याकरणे—

समयः—२८।१।४८ दिवसे मध्याह्नोत्तरं १२॥ वादनात् २॥ वादनं यावत्।

विषयः—लघुशब्देन्दुशेखरः (कारकान्तः)।

सभापतिः—पं० श्रीसभापत्युपाध्यायाः।

संयोजकः—पं० भूपनारायण झा।

न्याये—

समयः—२८।१।४८ दिवसे मध्याह्नोत्तरं ३ वादनात् ५ वादनं यावत्।

विषयः—सिद्धान्तलक्षणं व्युत्पत्तिवादे प्रथमाकारकं च

सभापतिः—पं० पद्मप्रसाद भट्टराई महोदयाः।

संयोजकः—पं० शिवदत्तमिश्रः।

क्वापि विद्यालयेऽधीयाना आचार्यवर्गीयाः पोस्टाचार्यवर्गीयाश्च छात्रा एवात्र प्रवेष्टुमर्हन्ति। तेषां विषये तत्तद्विद्यालयाध्यक्षद्वारा २५।१।४८ दिवसात्प्रागेव "प्रिन्सिपल, गवर्नमेन्टसंस्कृतकालेज बनारस" सविधे पूर्वोक्तविधया तन्नामादिप्रमापकपत्रागमनमावश्यकम्। विषयद्वयेऽपि सर्वोत्कृष्टत्वेन निर्णीताय च्छात्राय राजतमेकं पदकं प्रदास्यते।

३—सतीर्थ्यसम्मेलनम्

(काशिकराजकीय सं० म० प्राचीन-स्नातकसम्मेलनम्)

समयः—२९।१।४८ दिवसे मध्याह्नोत्तरम् १ वादनात् २ वादनं यावत्।

विषयः—स्वागतभाषणम्, परस्परं परिचयः, सतीर्थ्यपरिषदो गताधिवेशनविवरणं भविष्यत्कार्यक्रमनिर्धारणं च।

सभापतिः—दार्शनिकसार्वभौम पं० श्रीगोस्वामिदामोदरशास्त्रिणः।

संयोजकः—म० म० पं० नारायणशास्त्री खिस्ते।

Kirtikant Sharma Collection, Najafgarh

द्वितीय उपाधिवितरणोत्सव को सुशोभित करने वाले महानुभाव

बायीं ओर से – [कुर्सीपर] श्री शिवनाथ झारखंडी, ..., श्री त्रिभुवन प्रसाद उपाध्याय, म० म० श्री नारायणशास्त्री खिस्ते, म० म० श्री गिरिधरशर्मा चतुर्वेदी (दीक्षान्त भाषणकर्ता), श्री चुन्नीलाल साहनी (शिक्षा सञ्चालक), मा० श्री सम्पूर्णानन्द जी, शिक्षा-सचिव (सभापति), श्री डा० मंगलदेवशास्त्री (कुलपति), श्री गोपालशास्त्री नेने, श्री भगवत्प्रसाद मिश्र, श्री मुरलीधर मिश्र, श्री मुकुन्दशास्त्री खिस्ते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४—संस्कृतकविसम्मेलनम् ।

समयः—२९।१।४८ दिवसे मध्याह्नोत्तरं २ वादनात् ५ वादनं यावत् ।

विषयः (क) स्वतन्त्रभारतम् ।

(ख) भारतीयसंस्कृतेर्गौरवम् ।

(ग) संस्कृतविश्वविद्यालयः ।

सभापतिः—पं० श्रीताराचरणभट्टाचार्याः ।

संयोजकः—म० म० पं० नारायणशास्त्री खिस्ते ।

(१) छात्राणामत्र प्रतियोगितायां प्रवेशो नानुमतः ।

(२) प्रतियोगितायां प्रथमत्वेन द्वितीयत्वेन च निर्णीताभ्यां कविभ्यां प्रत्येकं पदकमेकं प्रदास्यते ।

लखनऊ, जनवरी, २४, १९४८ ई०
नं० १६९९ । प्र० मं०

मुझे यह जानकर हर्ष हुआ कि भारतीय विद्या के प्राचीन केन्द्र काशी में एक संस्कृत अनुसंधान-शाला स्थापित करने का आयोजन किया जा रहा है । सरस्वती-भवन का संस्कृत-पुस्तकालयों में प्रमुख स्थान है । इस संस्था ने संस्कृत भाषा की जो सेवा की है वह सराहनीय है ।

आशा है कि नवीन अनुसंधानशाला संस्कृत भाषा के प्रसार और अन्वेषण में प्रमुख भाग लेगी । स्वतन्त्र भारत में संस्कृत की जो महत्ता होगी उसपर कुछ कहना अनावश्यकीय है । संस्कृत हमारी राष्ट्रभाषा हिन्दी की जननी है । हिन्दी में जो कुछ भी शब्द-कोष तथा साहित्य की नई वृद्धि होगी उसका स्रोत संस्कृत ही होगी । अतएव इस अनुसंधानशाला से हमारी राष्ट्र-भाषा को बड़ी आशा है । मैं इस आयोजन की सफलता चाहता हूं ।

गोविन्द वल्लभ पन्त

श्री गंगदेव शास्त्री,
प्रिंसिपल, गवर्नमेंट संस्कृत कालेज, बनारस ।

---

५ कैसल्स रोड
लखनऊ ।
२० जनवरी, १९४८

श्रीमन्

मुझे यह जानकर बड़ी प्रसन्नता हुई कि हमारी प्रान्तीय सरकार ने सरस्वती भवन को संस्कृत अनुसंधान संस्था में परिवर्तन करने का निश्चय कर लिया है । प्राचीन काल में हमारा संस्कृत साहित्य का भंडार बहुत सा लोप हो गया, कुछ विदेशों में चला गया, कुछ जला दिया गया । किन्तु अब भी उसका कुछ अंश देश के भिन्न भिन्न स्थानों में है । काशी ही इन सबको एकत्र करने के लिये समुचित स्थान है और आप के ही यहाँ से मैं आशा करता हूं कि विविध विषयों की पुस्तकनिधि संसार को लाभान्वित और चकित करेगी और इनहीके आधार पर अथवा आधुनिक ज्योति के सहारे नई नई पुस्तकों की रचना होगी ।

शुभाभिलाषी
सीताराम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Copy of telegram dated 29th January, 1948 from Shri B. G. Kher, Premier Bombay, to Dr. Mangal Deva Shastri, Principal, Govt. Sanskrit College, Banaras.

"Congratulations on your decision to inaugurate Sanskrit Research Institute. Wish you all success."

—B. G. Kher—

Vice-Chancellor,
University of Bombay.

Bombay,
20th January, 1948.

Dear Dr. Mangal Deva Shastri,

The Government Sanskrit College of Benares is undoubtedly the oldest institution of its kind in modern India having been established in 1791. For over 150 years it has discharged the function of an Institute meant for the preservation, cultivation and improvement of Sanskrit Literature. It has collected a magnificient library of Sanskrit manuscripts (probably the biggest in the world) and also an important collection of printed books, Indian as well as European, in relation to Sanskrit literature. Such an Institute is pre-eminently fitted for conducting research in the culture and antiquities of India for the benefit of the rising generation. I fervently hope that the Institution after more than 150 years of useful work will start on a more inspiring and more useful mission in the cause of Sanskrit learning than it has done during the last century and a half. I wish your new Institution every success and good luck.

Yours Sincerely,
Sd. P. V. Kane.

Dr. Mangal Deva Shastri,
Principal, Govt. Sanskrit College,
Banaras.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

D. O. No. VC—67/48.

Senate House
Allahabad,
8th January, 1948.

Dear Dr. Mangal Deva Shastri,

It gives me much pleasure to know that the Government Sanskrit College Library or the Sarasvati Bhavana is going to be raised to the status of the Sanskrit Research Institute and that Hon'ble Shri Sampurnanand, Minister of Education, will perform the inauguration ceremony on the 30th of January. I wish success to the Institute in the fulfilment of its new aims. The preservation and interpretation of India's cultural and literary heritage is a task of great importance and I hape the Institute will succeed in its undertaking to do so.

Yours Sincerely,
Sd. Tarachand.

Dr. Magal Deva Shastri,
Principal, Govt. Sanskrit College,
Benares.

No. 1289/XV.

Agra University
(Camp Office)
Allahabad,
19th January, 1948.

The Principal,
Government Sanskrit College,

Dear Sir,

The Government Sanskrit College has been rendering signal service to the cause of ancient Indian culture and the Sanskrit language. It richly deserves the status which is sought by our popular Government to confer upon it. As a Sanskrit Research Institute it will render greater service to the country in reviving and maintaining the ancient heritage of the Hindus.

I wish the function every success.

Your truly,
Sd. N. P. Asthana,
Vice-Chancellor.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

CHAIRMAN

Public Service Commission,
United Provinces,
'Maya', George Town,
Allahabad,
9th January, 1948.

Dear Sir,

It is a great pleasure to me to know that the Saraswati Bhawan is being truned into a Sanskrit Research Institute, and that the inauguration ceremony is to take place on January 30. It is appropriate that the ceremony should be performed by the Hon'ble the Education Minister, who is not only a scholar himself but also a friend of genuine scholarship. I have no doubt that under the fostering care of Government the Institute will become a true centre of scholarship and research.

Yours Sincerely,
Sd. Amaranatha Jha.

Dr. M. D. Shastri,
Government Sanskrit College,
Banaras.

Prof. Renou,
Director,
University of Paris,
Institute of Indian Civilisation.

Paris.

Dated 10. 1. 48.

Dear Director,

I regret very much not to be able to take part personally in the ceremonies, which mark the transformation of the old Govt. Sanskrit College of your city into a research Sanskrit Institute. Like all the Indianist of the world I also owe much gratitude to the celebrated and respectable Sanskrit College of Banaras which has maintained without fail, throughout the period of many years, the honour of Indian studies. Who among us has not had often to consult the fine periodical 'The Pandit' which has published so many important texts and so much precious research material ? Who having had the opportunity of visiting your city has not admired that incompara-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ble library which contains treasures of unpublished material? Prof. Sylvain Levi our late lamented teacher used to say this often with emotion.

On this day, I, on behalf of myself as well as the Indian Institute of Sorbonne which I represent, wish your glorious institution the most complete success. May I, with you, cheer from afar the progress of Sanskrit Studies to which you have attached your name. May the studies be able to usher in this troubled world the light of a new Dharma!

Yours Sincerely,

Sd. Renou.

P. S.

Allow me to add my personal greetings, I shall always be glad to draw up reports of your works and those of your institute in our 'Journal Asiatique'.

School of Oriental and African Studies,
University of London, W. C. I.,

RLT/MI/954. *20th January, 1948.*

My dear Principal,

My love for India, its ancient learning and the vast wealth of all its languages was nourished during happy years within the walls of Queen's College, which was, and I trust still is, also the meeting place of the Sanskrit College with whose learned Pandits I had the privilege of most happy and fruitful association. I trust that in this great Institution in London, devoted to the learning and history of all Eastern lands over which I have the honour to preside, we have something of that enthusiasm for the pursuit of knowledge which has so long distinguished the Sanskrit College of Banaras.

I am, my dear Principal,
Yours Sincerely,

Sd. R L. Turner.

The Principal,
Government Sanskrit College,
Banaras, (India).

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

BHANDARKAR ORIENTAL RESEARCH INSTITUTE
P. O. DECCAN GYMKHANA,
POONA 4 (India)

15th January, 1948.

To

Dr. Mangal Deva Shastri, M. A., D. Phil. (Oxon).
Principal,
Government Sanskrit College,
Benares.

My dear Dr. Shastri,

The services of the Sarasvati Bhavan to the cause of Sanskrit learning have been very great. In fact all research workers in Indology owe a deep dept of gratitude to it on account of its unceasing and varied publication activity of several decades and the facilities given by it for the use of its biggest treasure-house of 50,000 manuscripts, the Cynosure of all scholarly eyes in a free India.

With Best Wishes.

Yours sincerely,

Sd. P. K. Gode,
Curator.

R. N. Dandekar, M. A., Ph. D.,
Hon. Secretary.

Bhandarkar Oriental
Research Institute,
Poona 4.

20th January, 1948.

Dear Dr. Shastri,

Throughout the last so many years, Benares has enjoyed—and, I am sure, with the fullest justification—the reputation of being the centre of Sanskrit learning in this country. The monumental work done by the many academic bodies at Benares, for the promotion of Sanskrit studies will always be remembered with gratitude by students and lovers of that subject. The contribution, in this direction, of the Saraswati Bhavana itself has indeed been very great.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

You are to be congratulated on having to preside over the inauguration ceremony the Honorable Shri Sampurnanand, who, I know, is himself a versatile research Scholar.

Yours sincerely.

Sd. R. N. Dandekar.

Dr. Mangal Deva Shastri. M. A., D. Phil.,
Government Sanskrit College,
Benares.

DECCAN COLLEGE POST-GRADUATE AND RESEARCH INSTITUTE

S. M. Katre,
M. A. Ph. D. (Lon.)
Director.

10 Connaught Rd. Poona 1.
Poona (India).
15th January, 1948.
D. O. No. D. 1-1/2090.

Dear Dr. Shastri,

It is my proud privilege today to wish this new Research Institute a very long and honourable career, consistent with the hoary traditions of the holy city of Benares. May this new research centre proper and spread the culture of India far and wide and coordinate the traditional learning with the new knowledge into a synthesis which will herald a new world.

With regards,

Yours sincerely,

Sd. S. M. Katre.

Dr. Mangal Deva Shastri,
M. A., D. Phil.,
Principal, Govt. Sanskrit College,
Banaras.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

No. 733/21-1-48.

Oriental Institute,
Baroda, 20-1-48.

Dr. Mangal Deva Shastri,
M. A., D. Phil (Oxon).,
Principal, Government Sanskrit
College Banaras.

My dear Mangal Devaji,

It is a matter of great joy to all Sanskritists to learn that the sacred city of Banaras is once again taking up the leadership in the domain of Hindu thought and culture.

Yours Sincerely,

Sd. Bhattacharya,
Director.

(8006) 402 of 1947-48.
The Adyar Library,
The Theosophical Society,
Adyar, Madras, S. India.
Dr. Mangaldev Shastri, M. A., D. Phil.,
Principal, Sanskrit College, Banaras.

Phone No. 2663.

17th January, 1948.

Dear Sir,

Reference: Your printed letter dated 24-12-47 on the Sanskrit College being constituted into a research institution.

We send you our heartiest good wishes for the occasion and trust that the Research Institute will grow in importance and usefulness to the cultural advancement of our heritage as it has hitherto been the repository of our knowledge.

Thanking you,

Yours sincerely,

Sd. G. SRINIVASA MURTI,
Hony. Director.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुभाशंसापत्रिका

विलसति काशीपुर्यां पुस्तकशाला सरस्वतीभवनम् ।
इति नाम्ना विख्याता सुचिरं विदुषां प्रमोदकरी ॥

भारतीयैश्च पाश्चात्यैः पण्डितैर्विविधेरियम् ।
संपोषितातिविख्यातैर्लेभे कीर्तिं परां क्रमात् ॥

द्वेधा कोशैरयुतैः संपन्नां तामपालयत् क्रमशः ।
गङ्गानाथो गोपीनाथश्च चिराय यौवनारम्भे ॥

पण्डिताग्रेसरैः सम्पूर्णानन्दैरद्य रक्षिता ।
सेयं मङ्गलदेवैश्च प्राप्यतेऽनन्तरां दशाम् ॥

पूर्वं कतिपयमुद्रितपुस्तकरत्नप्रकाशनोद्युक्ता ।
आर्याणां प्राक्तनसंस्कारगवेषणपराद्य लसते सा ॥

कुञ्जन् राजाभिधो ग्रन्थशालां मङ्गलमण्डिताम् ।
संभावयति चाशास्ते कुशलं सुदिने मुदा ॥

सन्दर्भेऽस्मिन् साक्षात् सन्निहिते भवितुमस्म्यशक्तोऽहम् ।
यात्राक्लेशाद्भीतो गुरुतरकृत्यान्तरैर्निबद्धश्च ॥

सरस्वतीभवन्नितीरितो विशिष्टपुस्तकालयो लसेच्चिरं भुवि ।
प्रशस्तजान्हवीतटे विराजमानपुण्यकाशिपट्टणे सुपूजितः ॥

(C. KUNHAN RAJA)

मङ्गलाशंसनम्

१. अड्यार्ग्रन्थागारस्याध्यक्षः श्रीनिवासमूर्तिरहम् ।
मङ्गलदेवान् शास्त्रिप्रवरान् विज्ञापयाम्येवम् ॥

२. सरस्वतीभवनमित्याख्यया विदितां भुवि ।
ग्रन्थशालामद्य दिने मुदा संभावयाम्यहम् ॥

३. भवतः पत्रिकायां या सम्यग्वार्ता निरूपिता ।
सा महान्तं किलामोदं मम वर्धयते हृदि ॥

४. पंचाशद्भिः किंचिदूनैः सहस्रैर्या विभूषिता ।
कोशानां, सा ग्रन्थशाला नूनं भारतमण्डनम् ॥

५. तत्रत्यग्रन्थशालायाः पुस्तकानां परंपरा ।
प्रसाधिता सा क्रमशो राजते विश्वविश्रुता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६. गङ्गानाथैस्ततो गोपीनाथैश्च चिरलालिता ।
अद्य मङ्गलदेवानां लभते सेयमादरम् ॥

७. रक्षाधिकारमारूढाः संम्पूर्णानन्दपण्डिताः ।
इत्येतद्ग्रन्थशालाया भागधेयमनुत्तमम् ॥

८. अद्य पुस्तकशालेयं विद्वच्छ्रेष्ठैरधिष्ठिता ।
महद्गवेषणस्थानं मङ्गलाढ्यं प्रकल्प्यते ॥

९. ग्रन्थालयोऽस्मदीयोपि चिरादेतादृशोद्यमे ।
व्यापृतोऽस्यै यवीयस्यै स्वस्त्रै शंसति सत्कृतिम् ॥

१०. पूर्णे विजयमाशंसे भवतां प्रक्रमे नवे ।
ग्रन्थशाला चिरं भूयादार्यविद्याभिवर्धिनी ॥
बाणरुद्राब्धिवेदैश्च वसुचन्द्रे मिते दिने* ।
स्थापितं लसतां नित्यं तद्गवेषणमन्दिरम् ॥

*Kali 1844115(30th January, 48)

G. SRINIVASA MURTI,
HON. DIRECTOR,
ADYAR LIBRARY

Dr. Bimla Churn Law,
M. A., B. L., Ph. D., D. Litt.

43, Kailas Bose Street,
Calcutta 6.

The 9th January, 1948.

Dear Dr. Mangal Deva Shastri,

The Sarasvati Bhavana has a very wide reputation as an unique storehouse of valuable Sanskrit manuscripts as well as important printed books relating to Sanskrit language and literature. I wish the proposed Research Institute every success as it will be an important seat of Sanskrit learning.

Yours sincerely,
Sd. B. C. Law.

Dr. Mangal Deva Shastri, M. A., D. Phil. (Oxon).

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

P. V. RAMANUJASVAMI, M.A.,
DIRECTOR.

Sri Venkatesvara Oriental Institute,
Tirupati.

Dated 12-1-1948

My dear Dr. Shastri,

On behalf of the Sri Venkateswara Oriental Institute, Tirupati. I heartily welcome the Research Institute; the first of the kind to be started in Free India. The Saraswati Bhavana, by developing into a Research Institute will have the field for her activity widened and will, it is expected, reflect the Indian Saraswati in all her various forms which she might assure in these days of revival of the cultural and Literary heritage of our country.

Sd. P. V. Ramanujasvami,
Director.

Copy of telegram dated 28th January, 1948 from the Royal Asiatic Society, Bombay, to the Principal, Govt. Sanskrit College Banaras.

"Best wishes to your Sanskrit Research Institute in the home of the Sanskrit language.

Royal Asistic Society
Bombay

Mimamsakaratna Mimamsasiromani
V. A. Ramaswami Sastri. M. A.,
Professor in Sanskrit,
University College,
Hony. Director, Oriental
Manuscripts Library,
and
Head of the Department of Sanskrit
University of Travancore.

Trivandrum

23-1-1948.

Dear Professor Shastri,

I have very great pleasure to know that the Saraswati Bhavan Library of the Government Sanskrit College, Benares, is to be raised to a fullblown

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Research Institute and that the inauguration ceremony is to be performed by our renowned educationalist the Hon'ble Shri Sampurnanandji. We can hope that this will very soon develop into one of the premier research institutes of India and keep up the traditions of our great centre of learning where it is situated.

Yours sincerely,

Sd. V. A. Ramaswami Sastri.

Dr. Mangal Deva Shastri, M. A., D. Phil. (Oxon).,
Principal, Government Sanskrit College,
Benares.

Trivandrum

Mimamsakaratna Mimamsasiromani
V. A. RAMASWAMI SHASTRI, M. A.,
Professor in Sanskrit, University College,
Hony. Director. Oriental Manuscripts Library,
and
Head of the Department of Sanskrit,
University of Travancore.

श्रीः

वाराणसीक्षेत्रभवाधिरक्षितं "सरस्वतीवेश्म" महद्विराजते ।
गीर्वाणवाणीपृथुकोषसञ्चयैरमूल्यरत्नप्रभवं शिवाय नः ॥

एतस्मद्भवनात् प्राच्या नैके ग्रन्थाः प्रकाशिताः ।
विद्वद्वरैरधिकृतैः सद्विद्यानुजिघृक्षुभिः ॥

अनुग्रहाय सर्वेषां प्राच्यसंस्कारकाङ्क्षिणाम् ।
तस्योन्नतिं प्रार्थयामो "विमर्शालय"रूपिणीम् ॥

"सम्पूर्णानन्द"सुधियः विद्यामात्याः समुद्यताः ।
उद्घाटनाय तस्येति श्रुत्वा मोदामहे वयम् ॥

गीर्वाणवाणी जयतात् "सम्पूर्णानन्द"योगतः ।
भूयाद् भारतसाम्राज्ये राष्ट्रवाणी चिरन्तना ॥

व० अ० रामस्वामि शास्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

K. V. RANGASWAMI AIYANGAR

VASUMATIVILAS,
RANGACHARI ROAD
MYLAPORE, MADRAS.

24th January 1949.

Dear Dr. Mangaldeva Shastri,

I must respectfully congratulate the Government of the United Provinces, and the Hon'ble the Minister of Education, to whose inspiration I would ascribe the present sanction, on their wisdom and patriotism in deciding to make the Saraswati Bhavan a Research Institute. I am sure that the National Governments of Free India will recognize the All-India character of the new institution, and help to make it the premier institute of the kind in the world.

With kind regards, I remain,

Yours Sincerely,
Sd. K. V. Rangaswami
Aiyangar.

Dr. Mangal Deva Shastri, M. A. D. Phil. (Oxon).,
Principal, Government Sanskrit College, Banaras.
University of Allahabad

Sanskrit Department,
Allahabad,
the 26 January, 1948.

Dr. M. D. Shastri,
Principal, Govt. Sanskrit College,
Benares.

Dear Dr. Shastri,

Many thanks for the kind invitation to the inauguration ceremony of converting the famous Saraswati Bhavana Library to a Sanskrit Research Institute by the Hon'ble Shri Sampurnanandji, the great Minister of Education. This should be the precursor to the establishment of a Sanskrit University at Benares. In free India Sanskrit should get its proper recognition. Independence of India would be meaningless if Sanskrit culture do

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

not form the basis of the ultimate purpose of Indian life and the foundation of our morality and ethics.

Yours Sincerely,
Sd. P. K Acharya.
Mahamahopadhyaya,
M. A. (Cal.), Ph. D. (Leyden),
D. Litt. (Lond).,

Head of the Sanskrit Department
Vidarbha Mahavidyalaya,
Amraoti.

24 January 1948.

Dear Sir,

I am delighted to learn that the Saraswati Bhavana will soon be developed into a Reasearch institute. The Bhavana has already done meritorious work by its unique collection of Sanskrit Manuscripts and its publication of several rare Sanskrit works and justified its title as the Home of the Goddess Learning. This new development of the Institution will, I hope, lead to a further intensification of its activites and make it the foremost Research Institute of India. I wish it a very long and glorious life.

Yours sincerely,
Sd. V. V. Mirashi,
Principal and Professor of Sanskrit,
Vidarbha Mahavidyalaya, Amraoti.

महामहोपाध्याय, शास्त्ररत्नाकर, मीमांसाकेसरी, पण्डितसार्वभौम,
प्रिंसिपल, चिन्नस्वामि शास्त्री

133 Hazari Road,
Calcutta, 26, 27-1-48.

मान्याः श्रीमन्तोऽध्यक्षमहोदयाः

प्राप्तं सादरं प्रेषितमनुसन्धानमन्दिरप्रारम्भोत्सवनिमन्त्रणावेदकं पत्रम्। सुमहानानन्दस्समजनि। उत्सवसमये शरीरेण तत्रोपस्थातुमशक्नुवन्नपि सर्वथा मनसा समुपस्थास्ये। एतादृशेऽत्युत्तमे संस्कृतवाङ्मय-जीवाती अनेहसो बहोरेव श्रीमतां तीव्रतमविचारपथमारूढेऽद्य कार्यरूपेण परिणतेऽस्मिन् पवित्रतमे कार्ये सर्वथा स्वशक्तिमनतिक्रम्य साहाय्यमाधातुं समुत्सुकस्सन्नद्धश्चाहमस्मि। मन्ये श्रीमन्तोऽपि मामकं भावमान्तर-मत्र साधु जानन्त्येवेति। कार्यभारमिमं वोढुमुद्यतानां श्रीमतां संस्कृतोन्नतौ पूर्वमेव सुमहत् बद्धादराः अथ च तद्धर्ममर्माभिज्ञाः संयुक्तप्रान्तीय-शिक्षासचिवा माननीया श्रीसम्पूर्णानन्दमहोदयाः सर्वप्रकारम् हस्तावलम्बंदद्युः, तेन च कार्यमिदं सफलयित्वा भगवत्यास्सुरभारत्या महिमानं पुरेवोच्चपदे स्थापयेयुः, तदर्थं च भूतभावनो भगवान् श्री विश्वनाथः श्रीमतः, श्रीमन्त्रिमहोदयांश्च यथावदनुगृहीयादिति कार्येणानेन सर्वथा स सन्तुष्येदितिच सुदृढं विश्वसिमि।

भावत्कः
चिन्नस्वामिशास्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुलपति डाक्टरमंगलदेवशास्त्रिकृतभाषणस्य संस्कृतानुवादः

माननीयसभापतिमहोदयाः, देव्यः, सज्जनाश्च !

अद्वितीयो ह वा एष शुभावसरः काशिकराजकीयसंस्कृतमहाविद्यालयस्य दैर्घकालिक इतिहासे यद्वयमद्य, सहैव तस्य द्वितीयेनोपाधिवितरणोत्सवेन, तदीयानुसन्धानमन्दिरस्य प्रारम्भोत्सवमपि संभावयितुं समवेताः स्म ।

वर्षमिदं हि भारतवर्षस्येतिहासेऽभूतपूर्वम् । अनन्तरं हि बहूनां शताब्दीनां तस्य सुदिनं भूयः समुपस्थितम्, वयं च स्वकीयभाग्यविधातारः संवृत्ताः स्मः । एतादृशे सुयोगे संभाव्यमान एष प्रारम्भोत्सवोऽपि नूनं किमप्यद्वितीं वैशिष्ट्यमावहति । सत्यमागामिनो भव्यभारतस्य शुभसंकेत एषः ।

तदेतस्मिन् चिरायाविस्मरणीये शुभावसरे अहमात्मनो महाविद्यालयस्य च सकाशाद् भवतः सर्वेषां महानुभावानां हार्दिकं सुस्वागतं ब्रवीमि ।

प्रसन्नताया विषयो यदुक्तनवीनसंस्थाया उद्घाटनार्थमस्मत्प्रार्थना माननीयैः शिक्षामन्त्रिभिः स्वीकृता । तदर्थं सर्वेऽपि वयं तेषामतीव कृतज्ञाः । नूनमस्या नूतनसंस्थाया उपक्रमे त एव हेतवः । अतस्तानेव पुरस्कृत्य तस्याः प्रारम्भोत्सवो निर्वर्त्यतामिति सर्वथा समुचितम् । परं तदर्थं तेषामर्थनायाः प्रागिदमावश्यकं प्रतीयते यत्प्रकृतदृष्ट्या महाविद्यालयस्यैतिहासिकपर्यवेक्षणेन अनुसन्धानमन्दिरस्याधारभित्तेः स्वरूपं विशदीक्रियताम् ।

ऐतिहासिक-पर्यवेक्षणम् ।

सरस्वतीभवनम्

यान्युद्देश्यान्यवलम्ब्य एष महाविद्यालः १७९१ ई० वर्षे स्थापित आसीत् तेषु खलु संस्कृतवाङ्मयस्य संरक्षणं प्रचारः समुन्नतिश्चेति मुख्यान्यासन् । एषामुद्देश्यानां पूर्त्तये विशुद्धमहाविद्यालयविभागेन सममेव पुस्तकालयस्याप्येकस्य स्थापनावश्यकत्वेनामन्यत । वर्तमानस्य विशालस्य सरस्वतीभवनस्य प्रारम्भस्तस्मादेव पुस्तकालयादजायत । तत्कालादारभ्यैव पुस्तकालयेऽस्मिन् विशेषदृष्टिर्दीयते स्म । आदौ महाविद्यालयप्रधानाध्यापक एव पुस्तकालयकार्यभारोऽपि न्यस्त आसीत् । प्रायेण १८१३ ई० संवत्सरे पुस्तकालयस्यापि कृते विशिष्टस्थानमेकं निर्मातव्यमित्येष निश्चयः क्रियते स्म । तस्मिन्नेव काले शतरूप्यकमासिके पुस्तकालयाध्यक्षस्य नियुक्तिः संजाता, पञ्चाशद्रूप्यकवेतनौ च द्वौ सहायकौ नियुक्तौ ।

संस्थापकानामभिप्रेतमासीद् यत्प्राग्वर्तिराजनीतिकविप्लववशात् कालकवलितानां प्राचीनपुस्तकालयानां यत्र तत्र विच्छिन्नैर्विलुप्तप्रायैश्च पुस्तकैः सहैव काश्यां बहिश्च निवसतां प्रसिद्धप्राचीनपण्डितकुलानां पुस्तकसंग्रहाणामेकत्रीकरणं संरक्षणं चोक्तपुस्तकालयद्वारा सुशकं भविष्यति । अस्मिन् विषये सरस्वतीभवनेन प्रभूता सफलता समधिगतेत्यत्र नास्ति संदेहः । अद्य मुगलशासनकाले सुप्रसिद्धस्य विदुषः पुस्तकसंग्रहीतुश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीमहोदयस्य नामाङ्कितानि उपशतं पुस्तकानि, भट्टभट्ट-शेष-धर्माधिकारिप्रभृति-सुप्रसिद्धकुलानां चानेके हस्तलिखितपुस्तकसंग्रहाः सरस्वतीभवने सुरक्षितानि विद्यन्ते। किं बहुना, नास्त्यत्र संदेहो यद् अद्यत्वे पृथिव्यामतिप्रसिद्धेषु हस्तलिखितसंस्कृतमहापुस्तकालयेषु सरस्वतीभवनस्याप्येकं प्रमुखं स्थानमस्ति।

भारतीयसंस्कृतिसाहित्यविषकः सरस्वतीभवनस्थो विभिन्नभाषासु मुद्रितानां पुस्तकानां संग्रहोऽपि स्वकीयं वैषिष्ट्यं भजते। वस्तुतः सरस्वतीभवनं (यदीयभव्यभवननिर्माणं डाक्टरवेनिसमहोदयस्य प्रभावेण १९१४ वर्षे संपन्नम्) स्वत एव महाविद्यालयस्यास्य अमूल्या संपत्तिरस्ति।

ग्रन्थ-प्रकाशनम्

अनेन महाविद्यालयेन संस्कृतवाङ्मयस्य विलुप्तप्रायाणां दुर्लभानां च ग्रन्थानां संरक्षणेन सहैव एतद्वाङ्मयप्रकाशनविषये यत्कार्यं कृतं तदपि महत्त्वपूर्णमेव। चिरादेव महाविद्यालयोऽयं संस्कृतक्षेत्रे साहित्यिककार्यस्य प्रधानकेन्द्रत्वेनैव स्थितः। अस्य दीर्घ इतिहासे एतदध्यक्षाध्यापकैः स्वयमेव स्वप्रेरणया वा अस्यां दिशि यावत्कार्यं संपादितं तदुपरि पर्यवेक्षणात्मकदृष्टिपातनमिहाप्रासङ्गिकं न भवेत्। तच्च कार्यं वयं स्थूलदृष्ट्या तिसृषु कोटिषु विभजामः।

प्रथमकोटौ तावद् वयं विभिन्नदृष्टिभिरद्य यावन्निष्पन्नं नवीनग्रन्थनिर्माणात्मकं तत्कार्यं स्थापयामो यद्द्वारा महाविद्यालयस्य संस्कृतसाहित्यसमुन्नतिविषयकमूलोद्देश्यस्य केनचिदंशेन पूर्तिर्जातेति कथयितुं शक्यते। एवंविधकार्यस्य प्रारंभः प्रथमतो महाविद्यालयप्रधानाध्यक्ष-श्री जे० म्यौर (१८४४-१८४५), डा० जे० आर० बैलण्टाइन (१८४६-१८६१) महोदययोः समये समजनि। एताभ्यां हि महोदयाभ्यां न केवलं तात्कालिक-पाठ्यक्रमे गणितेतिहासपदार्थविज्ञानप्रभृतीनां नवीनविषयाणां समावेशार्थमेव प्रयतितम्, किन्तु तेषु विषयेषु संस्कृतभाषायां नूत्नोदन्तोदोत्स-(=नूत्न+उदन्त+उदन्+उत्स=इंगलैण्डेतिहासः) इतिहासतमोमणि (=भारत-वर्षस्येतिहासः) पदार्थविद्यासार-मानसधर्म-(Mental & Moral philosophy) विज्ञानसारसंग्रह-(=Synopsis of Science) प्रभृतीनां नवीनग्रन्थानां निर्माणमपि कृतम्। ततः परं डा० बैलण्टाइनमहोदयस्य प्रयत्नेन स्थापितस्य तदानीन्तनस्य ऐंग्लोविभागस्य पर्यवेक्षणे पं० विट्ठलशास्त्रिप्रभृतिभिर्विद्वद्भिः कारिताः 'नोवुम् आर्गैनुम्' सदृशपाश्चात्यग्रन्थानां संस्कृतेऽनुवादा अपि अस्यामेव कोटौ निपतन्ति। खेदावहमेतद् यत्तदानीं प्रवर्त्तितमेतन्नूनग्रन्थनिर्माणकार्यं कतिपयप्रकारकत्रुटिवशात् स्थायित्वं न लेभे। परन्तु महाविद्यालयसंबन्धवशाद्वा तत्संबन्धस्योपयोगं विधाय वा यद् ग्रन्थनिर्माणकार्यं श्रीग्रिफिथ-थीबोप्रभृतिमहाविद्यालयाध्यक्षैः, म० म० पं० बापूदेवशास्त्रि, म० म० पं० सुधाकरद्विवेदि, म० म० पं० गङ्गाधरशास्त्रिप्रभृतिसुप्रसिद्धाध्यापकैश्च कृतं तस्य महत्त्वं कस्याविदितम्? एतदपि सुस्पष्टं महाविद्यालयस्यैव गौरवं ख्यापयति।

द्वितीयकोटौ महाविद्यालयस्य तन्महत्त्वपूर्णं कार्यं वर्त्तते यस्य सूत्रपातः श्रीग्रिफिथमहोदयस्य कार्यकाले १८६६ ई० वर्षे स्थापितस्य पण्डितपत्रापराभिधानस्य काशीविद्यासुधानिधिनामकसंस्कृतपत्रस्य रूपेण जातः। अस्य पत्रस्य मुख्यमुद्देश्यं हि दुर्लभसंस्कृतग्रन्थानां तेषाम् इंग्लिशभाषानुवादानां च प्रकाशनमासीत्। एतत्पत्रद्वारा, १८६६ वर्षादारभ्य १९१७ पर्यन्तम्, राजकीयमहाविद्यालयीयप्रसिद्धा-ध्यापकैः संपादितानां शतासन्नप्राचीनदुर्लभसंस्कृतग्रन्थानां (यथासंभवम् इंग्लिशभाषानुवादसहितानाम्) प्रथमवारं मुद्रणं प्रकाशनं च जातम्। कालेन प्रयत्नेऽस्मिन् शैथिल्यमुपागते १९२० वर्षे म० म० डा० गङ्गानाथझामहोदयस्य प्रयत्नेन 'सरस्वतीभवनग्रन्थमाला', 'सरस्वतीभवनानुशीलनपत्रिका' च प्रारभ्येताम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अद्यापि तत्कार्यं प्रायस्तेनैव रूपेण प्रचलति, पत्रिकयैव केवलमिदानीं प्राधान्येन संस्कृतपत्रिकारूपं धृतमास्ते। अस्यां नवीनग्रन्थमालायामद्य यावत् ८२ ग्रन्था इदंप्रथमं मुद्रिताः प्रकाशिताश्च। अनेके च ग्रन्था अद्यापि मुद्रणालय एव वर्त्तन्ते।

इत्थं पण्डितपत्र सरस्वतीभवनग्रन्थमालाद्वारा अद्य यावद् ग्रन्थानां प्रायेण द्विशती प्रथमतः प्रकाशिता। कस्या अपि स्थायाः कृते एतत् साहित्यिकं कार्यं गर्वस्य विषयो भवितुमर्हति।

तृतीयकोटौ तत्साहित्यिकं कार्यमागच्छति यस्य प्रकाशनं तु संस्थान्तरैः कृतम्, परन्तु यदर्थं न केवलं प्रेरणैव, किन्तु प्रधानसामग्र्यपि अनेन महाविद्यालयेनैव प्रदत्ता। अस्मिन् हि विभागे 'विजयनगरग्रन्थमाला', 'वनारस संस्कृत सीरीज़', 'चौखंभा संस्कृत सीरीज़' प्रभृतिग्रन्थमालाः, एतन्महाविद्यालयसंबद्ध म० म० पं० विन्ध्येश्वरीप्रसादद्विवेदप्रभृतिविद्वद्भिर्वैयक्तिकरूपेण संपादितग्रन्थांश्चान्तर्भावयामः। अस्यामपि कोटौ शतशो महत्त्वपूर्णा ग्रन्थाः समापतन्ति।

अनुसन्धानच्छात्रवृत्तयः

महाविद्यालये परीक्षार्थिनां छात्राणां कृते वृत्तीनां प्रबन्धे सत्यपि, अनुसन्धानकार्यार्थं छात्रवृत्तिप्रबन्ध ऊनविंशशताब्दीपर्यन्तं नासीदेव। अस्या न्यूनतायाः पूर्त्तिः १९०५ ई० वत्सरासन्नकाले डा० वेनिसमहोदयस्य प्रेरणया 'राजामुंशीमाधोलालप्रदत्त ४५००० रूप्यकात्मकनिधिद्वारा स्थापिताभिः साधोलालच्छात्रवृत्तिभिः संजाता। प्राधान्येन आधुनिकपद्धत्या अनुसन्धानशिक्षाप्रदानार्थमेव एतासां वृत्तीनां स्थापनमक्रियत। एता अद्यापि प्रचलन्त्येवं। १९२० ई० वर्षे म० म० डा० गङ्गानाथझा महोदयप्रेरणया वर्षत्रयस्थायिन्यो विंशतिरूप्यकमासिकात्मिकाः षट् पोस्ट-आचार्यच्छात्रवृत्तया प्रतिवर्षं दातव्या इत्यधिकारिभिर्घोषितम्। प्रौढपाण्डित्यप्रवर्धनमेव निरुक्तवृत्तीनां लक्ष्यत्वेन निर्दिष्टमासीत्।

अनुसन्धान-मन्दिरस्यावश्यकता

उपरिनिर्दिष्टेनैतिहासिकपर्यवेक्षणेन स्पष्टमिदं यदनेन महाविद्यालयेन अद्य यावद् यद् वाङ्मयप्रकाशनसंबन्धि अनुसन्धानसंबन्धि च कार्यं कृतं तत् स्वसमयदृष्ट्या सन्तोषावहमिति कथयितुं शक्यते। तथापीदं सत्यमस्ति यद् महाविद्यालयसंबन्धिकार्यक्रमे तेन कार्येणाद्य यावत् कदापि प्रमुखस्थानं न लब्धम्। अत इदं स्वाभाविकमेव यत संस्कृतजगति साहित्यिकानुसन्धानकार्ययोर्वर्त्तमानमानदृष्ट्या तत्कार्यमसाम्प्रतिकं प्रतीयते। अत आधुनिकपरिस्थितिं निभालयता इदमेव वक्तव्यं यदवसरोऽयमुपस्थितो यदा उपर्युक्तं सर्वं कार्यं वास्तविकताधारेणैव संपादनीयम्। शब्दान्तरैः, सरस्वतीभवनस्य विशिष्टानुसन्धान-मन्दिररूपेण संवर्धनं विकासश्च प्राप्तकालत्वेनात्यावश्यकं संजातम्। शासकैः १९३८ ई० वर्षे स्थापितया 'महाविद्यालयपुनःसंघटनसमित्या' एष एव प्रस्तावस्तेषां पुरः सुदृढं स्थापित आसीत। प्रसन्नतास्पदमेतद् यदधिकारिभिः स प्रस्तावः स्वीकृतः, तत्परिणामरूपश्च संस्कृतज्ञलोकेन चिराय सोत्कण्ठमुदीक्षितो वासरो लोकविदितसंस्कृतवैदुष्याणां संस्कृतविषयकप्रगाढानुरागाणां च एतत्प्रान्तीयमाननीयशिक्षामन्त्रिणां तत्परतया समुत्साहेन चाद्य समुपस्थितः।

अनुसन्धान-मन्दिरस्य रूपरेखा

पूर्वोक्ताधारभित्तौ निर्मीयमाणम्, चिरन्तनकालात् संस्कृतविद्याया अद्वितीयप्रतिष्ठानभूतायामस्यां वाराणस्यां च स्थाप्यमानमेतदनुसन्धानमन्दिरं स्वभावत एव सर्वेषामाशाबाहुल्यस्य केन्द्रं भविष्यतीति न प्रतिपादनमपेक्षते। तथापि केनापि मानदण्डेन एतत्कार्यं स्वक्षेत्रेऽनुसन्धानमन्दिरान्तरस्य कार्याद् उच्चकोटिकत्व

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चेद् निम्नकोटिकमपि भवितुन्नार्हति । एतदनुसन्धानमन्दिरस्थापकानामधिकारिणामपि ईदृश एवाभिप्राय इति मे विश्वासः । अनया दृष्ट्या एतदनुसन्धानमन्दिरस्य लक्ष्याणि वयं तात्कालिकदैर्घकालिकभेदाभ्यां विभजामः । प्रारम्भिककाले अस्य कार्यक्षेत्रं स्वभावत एव तात्कालिककार्यक्रमेण सीमाबद्धमेव तिष्ठेत्, दैर्घकालिककार्यक्रमस्तु कालान्तरेणैव व्यवहर्तुं शक्येत ।

तात्कालिककार्यक्रमः

अनुसन्धानमन्दिरस्य तात्कालिककार्यक्रमस्तावदधोनिर्दिष्टप्रकारेण चतुर्विधो भवेत्—

(१) ग्रन्थमाला
(२) अनुसन्धानपत्रिका
(३) उत्तराध्ययन(=Post-graduate Study)स्य अनुशीलनानुसन्धानयोश्च प्रबन्धः
(४) हस्तलिखितपुस्तकानां प्रामाणिकसूचीपत्राणि ।

एतेषां विवरणमधो निर्दिश्यते—

ग्रन्थमाला अनुसन्धानपत्रिका च

स्वनामानुरूपमस्यानुसन्धानमन्दिरस्य सर्वतो मुख्यमिदमेव लक्ष्यं यदेतन्महाविद्यालयसंसृष्टाः, अनुसन्धानमन्दिरसम्पर्किणश्च विद्वांसः स्वविशिष्टविषयेषु वैज्ञानिकप्रक्रियानुसारम् अनुसन्धानकार्यं कर्तुं प्रेरिताः प्रोत्साहिताश्च भवेयुः, तेषामनुसन्धानकार्यस्य च समुचितप्रकाशनप्रबन्धो विधेय इति । तदर्थं तावन्महाविद्यालयस्य 'सरस्वती सुषमा' पत्रिकैव त्रैमासिकानुसन्धानपत्रिकारूपेण प्रकाशनीयेति निर्धारितम् । एवमेव सरस्वतीभवन-ग्रन्थमालामपि उत्कृष्टग्रन्थमालारूपं ग्राहयित्वा, तस्यां वैज्ञानिकपद्धत्या सम्पादितानां प्राचीनानाम्, अद्यावधि अमुद्रितानां, ग्रन्थानामेव सामान्यतः प्रकाशनं भवेदित्यपि अस्मदीयो विचारः । प्राधान्येन नैकशताब्दीतो वाराणस्यामध्ययनाध्यापनपरम्परायां प्रचलितेषु वेदव्याकरणदर्शनतन्त्रधर्मशास्त्रविषयेष्वेव विशिष्टग्रन्था महाविद्यालय-स्थैरन्यैश्च विद्वद्भिः सम्पाद्य ग्रन्थमालायामस्यां प्रकाशिता भवेयुः । महत्त्वभाजो मौलिकग्रन्था अप्यत्र प्रकाश्येरन् ।

प्रचीनग्रन्थसम्पादनविषये वैज्ञानिकपद्धतेः परमावश्यकतेति न तिरोहितं विदुषाम् । परमेतत् खेदास्पदं यदद्यापि अस्मद्देशे तन्महत्त्वं प्रायेण नावगम्यते । यः कोऽपि, नितरां ग्रन्थसम्पादनकलया अपरिचितोऽपि, स्वेच्छानुरूपं सम्पादनकार्यं कर्तुमारभते । नासौ संपादनकार्यार्थमाधारपुस्तकानां तत्पाठान्तराणां वा परस्परसंबन्धमवगन्तुं पारयति, न च तेषां प्रामाणिकतामप्रामाणिकतां वा परीक्षितुं शक्नोति । एतस्या अनास्थाया एवैष दुष्परिणामो यदनेकेषां प्रकाशितग्रन्थानां पाठाः प्रायेणोत्तरोत्तरं भ्रंशमाना दृश्यन्ते । अनेकेषां च तेषां प्रामाणिकता संपादकानामसावधानतावशाद्वा मूलग्रन्थे मनःकल्पितपाठपरिवर्तनादिहेतुभिर्वा, साधारण मूलादर्शपुस्तकापेक्षयापि, न्यूनतरैव दृष्टिपथमागच्छति । एतस्या दुष्परिस्थितेः प्रतीकारार्थं यत्रैकतोऽद्यावध्य-मुद्रितानां ग्रन्थानां प्रकाशनमावश्यकम्, तत्रैव परतस्तेषां सम्पादने वैज्ञानिकप्रक्रियाया अवलम्बनमपि सविशेषमा-वश्यकम् । एतासामावश्यकतानां पूर्तिरेव प्रथमं लक्ष्यं भवेदुक्तग्रन्थमालाया इत्येष नो निश्चयः ।

अनुसन्धानार्थं छात्रवृत्तयः

आशास्महे यदियं संस्था किञ्चित्कालान्तरमेव अनुसन्धानेन सहैव उत्तराध्ययनस्यानुशीलनस्य च केन्द्रत्वपदमवाप्स्यति । इदमेवाभिलक्ष्य अद्यत्वे छात्रेभ्य आकर्षणरहिता महाविद्यालयस्य पोस्ट-आचार्यवृत्तीरपास्य यत्स्थाने कतिपयास्तद्विशिष्टाश्छात्रवृत्तयः स्थापिताः सन्त्यधिकारिभिः । एता वृत्तयो 'विशिष्टाचार्य' 'वाचस्पति'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नामक विशिष्टपरीक्षयोः कृते दास्यन्ते। एतदध्ययनकालश्च क्रमेण द्वे त्रीणि च वर्षाणि यावद् भविष्यति। वाचस्पतेः पदं विश्वविद्यालयानां 'डाक्टर' इत्युपाधेः समानं भवेदित्यस्माकमभिवाञ्छितम्। दृढमाशास्महे यदेताभिर्वृत्तिभि संस्कृतवाङ्मयविषये मौलिकानुसन्धानस्य नूतनग्रन्थनिर्माणस्य च प्रवृत्तिरभीष्टमुत्साहं लभेत। स्पष्टमिदं यदनुसन्धानानुशीलनयोः क्षेत्रस्य विस्तारेण सहैव संस्थायां विभिन्नविषयेषु विशेषज्ञानां विदुषामावश्यकता भविष्यति। नूनमत्र विषयेऽधिकारिणो यथावसरं दत्तावधाना भविष्यन्तीत्याशास्यते।

हस्तलिखितपुस्तकानां प्रामाणिक्यः सूचयः

अनुसन्धान-मन्दिरस्यान्तिमस्तु तात्कालिककार्यक्रमः सरस्वतीभवने संगृहीतानां पञ्चाशत्सहस्रासन्नानां हस्तलिखितपुस्तकानां परीक्षणपुरस्सरं विषयानुसारिवर्गीकरणं प्रामाणिकसूचीनिर्माणं च भविष्यति। कस्यापि पुस्तकालयस्य सदुपयोगाय तत्रत्यपुस्तकानां प्रामाणिकं सूचीपत्रमपेक्ष्यते। तत्र हस्तलिखितपुस्तकानां कस्यापि विशालसंग्रहस्य विषये तु, तत्र अद्यावधि अमुद्रितानां पारेसहस्रं ग्रन्थानां संभावना भवेत्, सूचीपत्राण्यतितरामावश्यकानि। एतत्सूचीपत्रनिर्माणप्रसङ्गेन कियन्ति तिरोहितानि अमूल्यानि ग्रन्थरत्नानि पुनर्लभ्येरन्निति न वक्तुं शक्यते। तानि ग्रन्थरत्नानि अन्वेषयितुम्, तेषां यथार्थं मूल्यं विनिश्चेतुम्, अपूर्णग्रन्थानां स्वरूपं निर्धारयितुञ्च विशेषज्ञ एव विद्वानपेक्ष्यते निरीक्षकत्वेनास्य कार्यस्य। भारते यूरोपीयदेशेषु च सुप्रसिद्धहस्तलिखितसंस्कृतपुस्तकसंग्रहाणां सूचीपत्राणि म० म० डा० हरप्रसादशास्त्रि-वेबर-कीथ-इग्लिंग-आउफ्रेख्प्रभृतिसुप्रसिद्धविद्वद्भिरेव सम्पादितानि सन्ति। एतादृशप्रामाणिकसूचिपत्रद्वारैव देश्या वैदेशिकाश्च विद्वांस एतादृशसंग्रहाणामुपयोगं कर्तुं शक्नुवन्ति।

अलमेतत्प्रतिपादनेन यदुपर्युक्तं तात्कालिकं कार्यक्रममेव यथाविधि सफलतापूर्वकं सम्पादयदिदमनुसन्धानमन्दिरं नूनं देशान्तरीयसंस्कृतानुसन्धानसंस्थासु प्रमुखमेकं स्थानमासादयितुं प्रभविष्यति। स्मरणीयन्त्विदमेव यत् कस्मिन्नपि कार्ये सफलताया रहस्यं तत्संपादनप्रकार एव निहितं भवति।

दैर्घकालिकः कार्यक्रमः

पूर्वं प्रतिपादितं यत्तात्कालिककार्यक्रमातिरिक्तो दैर्घकालिककार्यक्रमोऽप्येकोऽस्यानुसन्धानमन्दिरस्य भविष्यति। मम विचारेण तस्य कार्यक्रमस्य स्वरूपेण तथा व्यापकेन भाव्यं यथैतन्न केवलं महाविद्यालयस्यास्य साम्प्रतिकदेशव्यापिप्रभावस्य, भाविनो वा तस्य विस्तारस्य, किन्तु भारतीयसंस्कृतेः प्रमुखप्रतिष्ठानत्वेन विश्वविख्याताया अस्या वाराणस्या गौरवस्याप्यानुरूप्यं भजेत। अस्यायमेव निष्कृष्टोऽर्थो यदिदमनुसन्धानमन्दिरं तथाविकासमाप्नुयात् यथेदम्, न केवलमेशियाखण्डे, अपि तु सर्वस्मिन्संसारे, वास्तविकदृष्ट्या भारतीयसंस्कृतेः, साहित्यस्य, दर्शनस्य चोत्तराध्ययनार्थमनुसन्धानार्थमनुशीलनार्थं च प्रमुखं केन्द्रं भवितुं शक्नुयात्। अस्य दृष्टिर्विशालभारतीया भवेत्, वैदिकबौद्धजैनादिरूपेण विस्तृताया भारतीयसंस्कृतेरपेक्षया चास्य महत्त्वमन्ताराष्ट्रियं भवेत्।

अष्टादशशताब्द्या अन्तिमभागमारभ्य यन्महत्त्वयुक्तं कार्यं प्रायेण वैदेशिकैर्विद्वद्भिर्भारतीयवाङ्मयस्य, विशेषतः संस्कृतसाहित्यस्योद्धारार्थं कृतं तत्सर्वथा श्लाघनीयमेव। एतस्मिन्नेव काले भारतीयसंस्कृतेर्हृदयमन्तरात्मानं वा अवबोद्धुं तैर्बाढं प्रयतितम्। परन्तु सर्वोऽप्ययं तेषां प्रयत्नः सर्वथा श्लाघ्योऽपि भारतीयदृष्ट्या वस्तुतः सफलः सन्तोषावहश्चेति वक्तुं न शक्यते।

वस्तुतस्तु भारतीयसंस्कृतेर्वास्तविकं स्वरूपं तस्यामास्थावन्तो भारतीया एव विद्वांसो बोद्धुं बोधयितुं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च प्रभवन्ति। तथा संस्कृत्या इतिहासे एकदा मानवसमाजाय, न केवलं विशालभारतक्षेत्र एव, अपि तु मेक्सिकोपर्यन्तं विस्तृतेषु देशदेशान्तरेष्वपि, वास्तविकशान्तेः, सुखस्य, सहिष्णुतायाः, प्रेम्णश्च सन्देशो दत्त आसीत्। निखिलेऽपि जगति इयमेवैका संस्कृतिर्या लोकपरलोकयोर्भुक्तिमुक्त्योरभ्युदयनिःश्रेयसयोर्जातिव्यक्तयोर्विभिन्नधार्मिकसम्प्रदायानां च द्वन्द्वे परस्परं समन्वयं सामञ्जस्यं च स्थापयितुं शक्नोति सन्तप्तमुद्विग्नं च मानवसमाजं वास्तविकीं शान्तिं परस्परं सौहार्दं चोपदेष्टुं पारयति।

इत्थञ्च अस्यानुसन्धानमन्दिरस्य सर्वप्रधानं मौलिकं वा लक्ष्यन्तु भारतीयसाहित्यदर्शनयोरनुशीलनानुसन्धानाभ्यां भारतीयसंस्कृतेरन्तरात्मनो दर्शनं, तदीयवास्तविकसन्देशस्य च संसारे प्रचारणमेव भवितुमर्हति। निस्सन्देहमेतद् यदिदानीमनेकशताब्दनन्तरं दास्यबन्धनादुन्मुक्तेऽस्मिन्वातावरणे भारतीया एव कार्यमिदं कर्तुं शक्नुयुः। एतत् प्रधानं लक्ष्यमभिलक्ष्यैव अस्यानुसन्धानमन्दिरस्य दैर्घकालिककार्यक्रमो निर्धारणीयः। मन्मते तु लक्ष्येऽस्मिन् सफलताप्राप्त्यै अस्माकं दैर्घकालिको योजना अधोलिखितानुसारं भवितुमर्हति।

विशेषज्ञानां विदुषां नियुक्तिः

दैर्घकालिकयोजनां कार्यान्वितां कर्तुम्, विभिन्नविषयेषु अनुशीलनानुसन्धानानुकूलिकीं परिस्थितिं च संपादयितुं सर्वप्रथममनुसन्धानमन्दिरे तुलनात्मिकया ऐतिहासिकया च दृष्ट्या भारतीयपुरातत्त्वे भाषाविज्ञाने वेदादिवाङ्मये दर्शनविषये च विशेषज्ञानां विदुषां नियुक्तेरावश्यकता भविष्यति। ईदृशान्विदुषो विना विभिन्नविषयेषु वाचस्पतिसदृशपरीक्षाणां कृते समुचितप्रबन्धोऽपि न कर्तुं शक्यते। किञ्च प्रौढिदृष्ट्या विस्तारदृष्ट्या च महाविद्यालयेऽध्ययनाध्यापनयोर्दशायां क्रमशोऽभ्युन्नतिरप्यभीष्टा भविष्यति। तत्रापि पूर्वोक्तनियुक्तिभिर्नूनं साहाय्यं लभ्येत।

नूतनग्रन्थनिर्माणाय प्रोत्साहनम्

तात्कालिककार्यक्रमप्रसङ्गेन प्राचीनानाममुद्रितानां ग्रन्थानां प्रकाशनस्योल्लेखोऽस्माभिरुपरिष्टात् कृत एव। सहैव तेन इदमप्यावश्यकं यत्प्राचीनविभिन्नविषयेषु गम्भीरव्यापकाध्ययनानन्तरं नूतना निबन्धा लेखनीया इति। दृष्ट्यन्तरेणापि नूतनग्रन्थनिर्माणमावश्यकं प्रतीयते। अतिरोहितमेतद्विदुषां यदस्माकं चैरकालिकराजनीतिकदास्यवशात् संस्कृतसाहित्यस्य विभिन्नविषयेषु प्रगतिरनेकशताब्दीतोऽवरुद्धैव तिष्ठति। तेषां सर्वं दृष्टिक्षेत्रं मध्यकालीनमेव। या च पुनः स्वतन्त्रेषु देशान्तरेषु विद्यायाः साम्प्रतमभ्युन्नतिः सम्पन्ना तयास्माकं संस्कृतवाङ्मयमद्यापि अस्पृष्टमेवास्ते। अत एव संस्कृताध्ययनाध्यापने वर्तमानजगति अद्यापि प्राचीनवस्तुसंग्रहालयरूपेणैव दृश्यते। न तयोः सांप्रतिकता अद्यावधिकता वा विद्यते। अत्यन्तमावश्यकं यदियं स्थितिः परिवर्तेत, अस्माकं संस्कृतज्ञा विद्वांसश्च स्वस्वविषयेषु साम्प्रतिकज्ञानस्य समकक्षतामानेतुं प्रयतेरन्निति। अनया दृष्ट्यापि नूतनग्रन्थनिर्माणप्रवृत्त्यै प्रोत्साहदानमस्यानुसन्धानमन्दिरस्य विशिष्टं लक्ष्यं भवितुमर्हति।

वैदेशिकभाषाणां शिक्षणस्य प्रबन्धः

आधुनिकजगति जातैराविष्कारविशेषैरद्यत्वे संसारोऽयमतिसङ्कुचित इव प्रतीयते। गमनागमनयोः सौकर्यकारणेन अद्यत्वे तस्य विस्तारो व्यावहारिकदृष्ट्या प्राचीनकालिकैकप्रान्ततोऽप्यल्पीयानेव। अत एव देशदेशान्तरेषु परस्परं विचाराणामादानप्रदानं प्रात्यहिकं वृत्तम्। अत एव च ज्ञानस्य प्रत्येकक्षेत्रे क्रमशो लब्धपदा सार्वभौमता समालोच्यते। अस्यां परिस्थितौ संसारस्य समुन्नतज्ञानविज्ञानेन सह वास्तविकसंपर्कस्थापनार्थम्, वैदेशिकैर्विद्वद्भिर्यदद्भुतं गवेषणात्मकं कार्यमैतिहासिकतुलनात्मकप्रक्रिययोरवलम्बेन प्राचीनसंस्कृतीनां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषये कृतं तस्योपयोगार्थम्, भारतीयसंस्कृतिसन्देशं च देशान्तरेषु नेतुं संस्कृतज्ञानां विदुषां कृते तत्तद्देशीय-समुन्नतप्रधानभाषाणां विशेषतस्तु प्राचीनविशालभारतक्षेत्रस्य मुख्यभाषाणां ज्ञानमत्यन्तमावश्यकम्। अतएव मन्मते हिन्दुविश्वविद्यालय-काशीविद्यापीठयोः सहयोगेन अनेनानुसन्धानमन्दिरेण इंग्लिशभाषया सार्धं जर्मनी-फ्रांस-रूस-चीन-तिब्बतदेशीयभाषाणामपि शिक्षणस्य समुचितः प्रबन्धः करणीयः। मदीयोऽयं विश्वासो यद् यदीदमनुसन्धानमन्दिरं पूर्णविकासाय अवसरं लभते, तर्हि कतिपयवर्षानन्तरमेव तथाविधः समयः समुपस्थितो भविष्यति यदा प्राचीनकाले काश्यपमातङ्ग-उपाध्यायदीयङ्करश्रीज्ञान-कुमार जीव-परमार्थ-प्रभृतिभारतीयविद्वांस इव पुनरप्यस्माकं संस्कृतज्ञा विद्वांसोऽस्माकं संस्कृतेः सन्देशवाहका भूत्वा विदेशेषु गमिष्यन्ति, वैदेशिक-विश्वविद्यालयैश्च सह महोपाध्यायानां परिवर्तनञ्च प्रारप्स्यते।

विदेशीयानां विदुषामुत्तराध्ययनस्य प्रबन्धः

अनुसन्धान-मन्दिरेण आत्मन उपरिनिर्दिष्टकार्यक्रमे सफलता लभ्यते चेत्तर्हि न तद्दिनं दूरे यदा प्राचीनकालिक-इत्सिंग-फाहिआन-युआंग्च्वांग्-अल्बरूनीप्रभृतिविद्वांस इव अनेके वैदेशिका विद्वांसो भूयोऽपि भारतीयज्ञानस्य उत्तराध्ययनाय अनुशीलनाय च इहागन्तुं समुत्सुका भविष्यन्ति। तस्यामवस्थायां तादृशानां विदुषां कृते इह निवासविद्याध्ययनादिसौलभ्यस्यापि प्रबन्ध आवश्यकत्वेन करणीयो भविष्यति।

संक्षेपेणानुसन्धान-मन्दिरस्य दैर्घकालिककार्यक्रमस्य इयमेव रूपरेखा। परमस्य महाविद्यालयस्य यादृशे विकासे सर्वमेतत् सम्भाव्यते तादृशो विकासो नूनं विश्वविद्यालयरूपेण तस्य समुन्नतिमपेक्षते। अत एतन्महा-विद्यालयसंबद्धानां परःशतानां विद्यालयानां च प्रातिनिध्येन प्रान्तीयाधिकारिवर्गस्य पुरस्तादस्माकमियमेवाभ्यर्थना यद् यथासंभवम् भारतीयस्वतन्त्रताया ऐतिहासिकेऽस्मिन् वर्षे एव संस्कृतविश्वविद्यालयस्थापनासमारम्भस्य घोषणावश्यं क्रियताम्।

सौभाग्येन प्रान्तेऽस्मिन् संस्कृतशिक्षायाः प्रधानस्तम्भभूता अस्माकं माननीयाः शिक्षामन्त्रिमहोदया अद्यैव विराजन्ते। संस्कृतस्य संस्कृतविदुषां च प्रोत्साहनाय प्रभूतं प्रयतितमत्रभवद्भिः तदर्थं न पारयामो वयं पर्याप्तान् धन्यवादान् प्रदातुं श्रीमद्भ्यः। दृढमाशास्महे यन्नूनं श्रीमतां द्वारैवास्माकं विश्वविद्यालयस्यापि स्थापना भविष्यति। पर्यवसाने श्रीमन्तोऽनुसन्धानमन्दिरस्य **प्रारम्भणीयं भाषणम्** आरभन्तामिति प्रार्थ्य विरमामि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीः ।

दीक्षान्त—भाषणम्

महामहोपाध्याय—श्रीगिरिधरशर्म्म—चतुर्वेदस्य

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ।

शान्ते निःसीमधाम्नि स्वरचितमखिलं स्वान्तराधाय सुप्ते
सीमानं कल्पयन्ती कलित-गुणकला या प्रबोधं दधाति ।
ब्रह्माणं विष्णुमीशं सुरपतिमपि या स्व-स्व-कार्ये नियुङ्क्ते
सा नश्चिच्छक्तिराद्या कलयतु महती शर्म मायाभिधाना ॥

परम-माननीय सदसस्पते ! परम-माननीया विद्वन्मूर्द्धन्या महाभागाः !

परमिदमद्य सौभाग्यम्, यत्काशिक-राजकीय-संस्कृत-महाविद्यालयस्य द्वितीये उपाधि-वितरणोत्सवे स्नातकान् सन्देष्टुमहं श्रीमद्भिराज्ञप्तः । अतिरोहितमिदं सर्वेषां यत् संस्कृत-महाविद्यालयस्यास्य नेतृभिर्निश्चित एव संस्कृत-पाठ्य-क्रमः सर्वस्मिन् भारते समुपजीव्यते, एतत्प्रदत्ताः पदव्यः सर्वत्र सम्मान्यन्ते, सर्वेभ्योऽपि भारतान्तर्गत-जनपदेभ्यः परीक्षास्वेतदीयासु परीक्ष्यतया सुशिक्षिताः समागच्छन्ति, तथा च सर्वैरपि लक्षणैर्वहोः कालात् विश्व-विद्यालय एवायम् ; केवलं 'यूनिवर्सिटी' नामतो नासीद् व्यवहृत इति नाममात्रापकर्षोऽप्यस्येदानीं दूरीकर्तुमुपक्रान्तोऽधिकारिभिः । यथाऽधुनैव श्रीमद्भिर्माननीय-शिक्षामन्त्रिमहोदयाच्छ्रुतम् ।

तत एव तूर्णं विश्वविद्यालयनाम्ना व्यवहरिष्यमाणस्यास्य अतीताब्दादेवोपाधि-वितरणोत्सवाः समारब्धाः अधिकारिभिः ।

सर्वेष्वपि शिक्षितोचित-व्यवहारेषु दूरमुपेक्ष्यमाणा वराकाः संस्कृतच्छात्राः शिष्ट-समवाये पदवीप्रदान-सम्मानादपि वञ्चिता अभूवन्निति शल्य एवासीदेषां हृदये । स एष शल्य उद्धरणीय एवासीत्संस्कृतप्रणयिभिः । इतो द्वाविंशतेरब्देभ्यः प्रागेव मत्प्रस्तावेन जयपुर-राज्य-कर्णधारैर्जयपुर-महाराज-संस्कृत-महाविद्यालये उपाधिवितरणोत्सव-पद्धतिः प्रवर्तिता । इदानीं तु जगन्मान्येऽस्मिन् काशिके महाविद्यालयेऽपि सा समादृता पद्धतिः । अतीतेऽब्दे प्रवर्त्तितामिमां सुरभारतीपूजामनु भारतेन स्वातन्त्र्यमप्यवाप्तम् । द्वितीय एवायमुत्सवोऽद्य स्वतन्त्रे भारते प्रवर्तत इति किमुच्यतां सुरभारती-समर्हण-माहात्म्यम् । प्रत्यक्षमुपदिशति नो माता सुरसरस्वती ; 'मद्विमुखा एव यूयमवनतिगर्ते पतिताः, अद्यापि बुध्यध्वम्, मदभ्यर्हणेन स्वातन्त्र्यं लप्स्यध्वे, तेनैव पालयिष्यध्वे, समेधिष्यध्वे च ।'

ईदृशे सुमहत्यवसरे लब्धवर्णान् स्नातकान् समुपदेष्टुं कश्चित् सुविचक्षण एव समुचितः स्यात् । नास्ति मयि तथाविधा शक्तिः, अथापि महतामाज्ञा शिरोधार्यैवेत्याज्ञा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पालनमेवोद्दिश्य प्राप्त-पदवीकान् स्नातकान् प्रति किमपि वच्मि। अविद्योऽपि वयोवृद्ध इति कृत्वैवाशासे ते मदुक्तीः कर्णे कुर्युरिति।

प्रियाः पण्डितवर्याः! अवसरोऽयमस्मदाराध्यायाः सुरभारत्याः कृते अमूल्यः सदवसरोऽपि शक्यते वक्तुम्। महतः कृच्छ्रस्यापि चायमेवावसरः।

अद्य भारतमिदं स्वतन्त्रम्, राजाश्रयेण देवभारत्यां प्रहरन्तीनां भाषाणां व्यतीतः कालः। इदानीं सुरभारत्याः पुत्र्यः पौत्र्यो दौहित्र्यो वा राष्ट्रभाषापदेऽभिषिच्यन्ते। अतिवृद्धाया अपि तरुणायमानाया अस्याः संस्कृत-भारत्या अपि राष्ट्रभाषात्वं बहवः प्रस्तुवन्ति। रक्षणीया हिन्दू-संस्कृतिरिति वाक् तु सर्वेषामेव नेतॄणां मुखे जागर्ति। हिन्दू-संस्कृति-प्रणयिभिश्चागत्या समासेन्यैव संस्कृतिनिधानं संस्कृतभाषेति प्राप्त एवास्या अभ्युदयः। ता इमाः सदवसरवादिनां वाचोयुक्तयः।

अथ प्रकारान्तरेण दृष्टिकोणनिपाते विपरीतमेव प्रतीयते। केवलं स्वधर्मपक्षपातिनः स्व-संस्कृति-सेवका लौकिकं फलं किञ्चिदेव लभमाना अपि त्यागवृत्तिमवलम्ब्य संस्कृतभाषां सेवन्तेस्म। परमिदानीमन्नवस्त्रयोरतिमहर्घतामये समये अल्पवृत्त्या उदरदरीपरिपूरणमसम्भवमनुध्याय तेऽपि संस्कृताध्ययनाद् विवशा विरमन्तीति अल्पक्षेत्राया अस्या वराक्या अत्यल्पक्षेत्रत्वमापतितम्। यथा हि संस्कृतविद्वांस इदानीं वृत्तिकर्षिताः, न तथा मन्येऽन्ये केचिदपि। यद्यपि सुप्रतिष्ठितेषु सुप्रसिद्धेषु च कतिपुचिन्महा-विद्यालयेषु अध्यापकानां वृत्ति-विधाने औदार्यमधिकारिभिः प्रदर्शितम्, तेषु राजकीय-संस्कृतमहाविद्यालयस्यास्य मुख्यं स्थानम्। परमेषु एवंविधेषु वा विद्यालयेषु कति भाग्यवन्त आश्रयं लभन्ते। अङ्गुलिगणनीयैरेतावद्भिरेव किं संस्कृताभ्युदयः सम्भाव्यते? अन्यासु तु शतशः संस्कृत-पाठशालासु पण्डितानां सैव दशा? भोजनमात्रनिर्वाहोऽपि तत्र दुष्करः। दृश्यमिदं पश्यन्तः के संस्कृताध्ययने समुत्सहन्ताम्। हिन्द्यादि-भाषाणां राष्ट्रभाषात्वेऽपि संस्कृतविदुषां विविधेषु राजकीयेषु प्रजासम्बन्धिषु वा व्यवहारविभागेषु नास्ति प्रवेश-सम्भावना, यतो हि नैतेऽद्यापि शिक्षितेषु संख्यायन्ते। नैतेषामद्यापि बहुत्र सदस्य-निर्वाचनेऽप्यधिकारः, दूरे तु निर्वाचितेषु प्रवेश-सम्भावना। अभिनव-शासन विधान-निर्माणे न कोऽपि संस्कृतसेवायां यापित-जीवनो विद्वान् संस्कृतशास्त्राणामाशयमस्मिन् विषये पृष्टः। यदि स्वतन्त्रेऽपि भारते इयमस्या वराक्या उपेक्षा, तदा कस्तावदभ्युदयसमयः समागमिष्यतीति नैराश्यमेव पुरो भासते।

हिन्दू-संस्कृतेः स्वरूपमद्यत्वेऽस्मन्नेतृभिर्योरोपीया एव भाषाः पुरस्कृत्य स्थिरीक्रियत इति किमस्या आशास्थानं भवतु। यस्याः कथञ्चिद् भाषणेऽवबोधने वा समर्थानां संख्या द्वित्रलक्षेभ्यः कथमपि नाधिका, सा त्रिंशत्कोट्यधिक-जनतावासस्य जनपदपुञ्जात्मकस्य महादेशस्य राष्ट्रभाषा स्यादिति तु इदानीं प्रत्यक्षां परिस्थितिमपश्यतां कल्पनारसिकानां चेतोविनोदनमात्रम्।

तदित्थं महतो नैराश्यस्य समयोऽयमिति प्रतीयते। तदेवंविधे मातुर्जीवनमरणसन्धिसमये प्रियाः स्नातकाः! किं भवद्भिः प्राप्तव्यवहारैस्तूष्णीमेवावस्थातव्यम्? किमौदासीन्येनैव यापनीयः कालः? किमितस्ततो वृत्त्यन्वेषण एव योग्यता समापनीया? नहि, नहि, महानिदानीं कर्तव्यभारो भवतां शिरःसु समापतितः। इदानीं प्राणपणेन परिश्रम्य भवद्भिर्नैराश्यादुन्मोच्य यथोचिते प्रधान-सिंहासने 'प्रतिष्ठापनीयैव माता सुरसरस्वती। सर्वतः सम्प्लुतोदके उदपानमिवात्रैव महति कर्तव्ये सर्वकर्तव्यमन्तर्भवति वः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विद्वांसः ! व्याधिमपरीक्ष्य, निदानमविज्ञाय क्रियमाणा चिकित्सा न फलांयं कल्पते। तदेवंविधे प्रदर्शित-पूर्वे व्यतिकरे अस्ति कश्चिदस्माकं संस्कृत-सेवकानामपि दोषः ? उत परेषामेवात्याचार इति पूर्वं परीक्षणीयं स्यात्। स्वकीया यदि केचन दोषाःस्युस्तर्हि सर्वप्रथमं ते समुत्सार्याः, परेषामालोचनं पश्चाद् विधेयम्। तद्यदि समुत्सृज्य पक्षपातं निमीलितनयनं शान्तेन चेतसा निध्यायेत्, तर्हि सुस्पष्टं प्रतीयेतैव-यदस्माकं संस्कृत-प्रणयिनामप्यस्ति महान् दोषोऽयम् यदस्माभिः सर्व-विद्या-कला-निधानमियं सुरभारती अत्यल्प-क्षेत्रतामासादिता। मान्याः ! लौकिकं पारलौकिकं वा क तत्वं यत् सुरभारत्यां संक्षेपेण विस्तरेण वा न समालोचितं भवेत ? विविधो ह्यस्माकं विद्या-स्थानानां विभागः। धर्म-प्राधान्यमभिलक्ष्य चतुर्दश-विद्यास्थानानि स्मर्यन्ते—

पुराण-न्याय-मीमांसा—धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥

इत्याह भगवान् याज्ञवल्क्यः। आयुर्वेदो धनुर्वेदो गान्धर्ववेदः, स्थापत्यवेद इति चतुर उपवेदान् संकलय्य तान्येतान्यष्टादश सम्पद्यन्ते। नीतिप्राधान्यमधिलक्ष्य तु क्षत्रियाद्युचिताश्चतस्रो विद्याः संक्षेपेण परिगण्यन्ते—

'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती' इति, आध्यात्मिक-दृशा पश्यतां षड्दर्शन-विभागो द्वादश-दर्शन-विभागो वान्यविध एव जागर्ति। षट्त्रिंशद्दर्शनानि, चतुःषष्टि तन्त्राणि डामर-यामल-युतानीत्यपर एव विस्तरः। चतुःषष्टिमिताः कलाश्च अर्थसम्बन्धिन्यः, कामसम्बन्धिन्यश्च पृथग् विभज्य निरूप्यन्ते। गुरुचरणैः श्रीमधुसूदन-विद्यावाचस्पतिभिस्तु स्वीय इन्द्र-विजये विद्या एव चतुःषष्टिरनेकैः प्रकारैः परिगणिताः। इत्यासां विस्तरः। इदमेवात्र वक्तव्यम्, यद्विवेचनीयानां विषयाणां तथाविधो विस्तरः संस्कृत-भारत्यां समुपलभ्यते, यथाविधोऽन्यत्र दुर्लभ एव। ग्रन्थसंख्या विचारे तु सत्यमुक्तं स्वर्गत-श्रीहरप्रसादशास्त्रिणा सी० आई० ई०—पदभाजा संस्कृत-साहित्य-सम्मेलन-सभापतिपदात्—

'विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा।'

इति समुद्रवर्णने प्रसृता कवि-कुल-गुरोः कालिदासस्योक्तिः संस्कृत-वाङ्मयसमुद्रे पूर्णतया समन्वेति। बहुतराण्येव ज्ञानानि विज्ञानानि चैकैकस्मिन् विद्यास्थानेऽन्तर्भवन्ति। प्रथम-परिगणितां पुराणविद्यामेवावलोचयन्तु भवन्तः—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंश्यानुचरितं चैव पुराणं पञ्चलक्षणम्॥

इति पुराण-विद्याया मुख्या विषयाः;।

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहितां चक्रे भगवान् बादरायणः॥

इति च तत्र संयोजिता विषयाः। प्रसङ्गागताश्च गणनातीता एव विषयाः। पाश्चात्त्यैर्विद्वद्भिर्यानि विज्ञानान्यतिमहत्वास्पदानि मन्यन्ते, यस्य पठन-पाठनाभ्यामद्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वातिशायि वैदुष्यं मन्यते, तानि विकाशवादः, भुवनकोषः, भू-गर्भ विद्या, वनस्पति-विज्ञानम्, तत्त्वग्रामः—इत्येवं विधानि विज्ञानानि पुराणस्य प्रथमलक्षणे सर्गे एवान्तर्भवन्ति। विशदीकृतानि च पुराणेषु तत्र तत्र। सत्यमिदमनपलपनीयम्, यदिदानीं वैदुष्य-पारङ्गतैः पाश्चात्त्यैर्विद्वद्भिर्विज्ञानानीमान्यतिविस्तरं नीतानि, सुसूक्ष्मा गवेषणा एषु कृता। तत्साम्मुख्येऽस्माकं निरूपणस्य दारिद्र्यमेव प्रतीयेत। परं सत्यमस्माकमेव दोषो यदस्यां सहस्राब्द्यां वयमुदासीना एव स्थिताः। न पदात् पदमपि प्रचलिताः। यदास्माकं देशे विषयाणाममीषां निरूपणं ग्रन्थेषु कृतमासीत्-तदा सूत्ररूपेण निरूपणप्रक्रियैवादृताऽभवत्। विस्तरकाले तु वयं विज्ञान-विमुखा एवाऽभूम। इदमपि विचार्यम्—यदस्माकं ग्रन्थ-राशिः कतिधा विनाशं नीतः, कदाचिज्जले प्रक्षेपः, कदाचिद् भस्मसात्करणम्, कदाचिच्च देशादपहृत्य परत्र नयनम्, बहूनामज्ञानवशादत्रैव कीटजग्धिः, अवकरे प्रक्षेपः, कपर्दिकाभिर्विक्रयो वेति कत्यवशिष्टाः ग्रन्थाः। "एकोनामिक्स" पदेन या विद्येदानीमध्ययनाध्यापनयोर्बहुलं प्रचलिता सास्माकं विद्यास्थानेषु "वार्त्ता" इति व्यवहृतेति निर्विवादम्, उत्तमासु चतसृषु विद्यासु सेयमेकतमा परिगणिता, तेन कियाँस्तद्विस्तार आसीदिति शक्यमनुमातुम्। परमद्यत्वे नैकोऽपि ग्रन्थस्तत्सम्बन्धी संस्कृतवाङ्मये लभ्यते, केवलं पुराणेष्वेव संकेतेन तत्र तत्र विषयोऽयमालोचितो दृश्यते, नीतिग्रन्थेषु कथंचित्। सोऽयं ग्रन्थविनाशकृत एवोपप्लवः। सूत्ररूपेण निरूपणे त्वद्याप्यस्माकं तेषु तेषु विज्ञानेषूत्कर्ष एव प्रतीयते। विकासवादे प्राणिविकासे चतुर्दशविधो भूतसर्गोऽस्माकं पुराणेषु, साङ्ख्ये च दर्शने निरूपितः, परमाधुनिकं विज्ञानं तेषु षडेव प्राणिविधाः परिचिनोति, सत्वविकाशोऽष्टविधो देवसर्गस्तस्यापरिचित एव। तथैव भूगर्भ-विद्यायां सप्तभूस्तरा अतलादिपातालान्तनाम्ना पुराणेषु निरूपिताः। न तावन्तोऽद्यापि विज्ञानस्य परिचिताः। तथैव वंशो नाम पुराणविषयो न केवलं मनुष्य-परम्परामेव प्रस्तौति, किन्तु तत्तेषां तत्त्वानां या क्रमिकोत्पत्तिः सापि तत्रान्तर्भवति, तत्र ऊनपञ्चाशद् वायुविधा मरुन्नाम्ना पुराणेष्वाख्यायन्ते, तत्सम्बन्धादग्निविधा अप्यूनपञ्चाशद् वायुपुराणे निरूपिताः, एवमेव तत्तेषां विस्तार—इति न वयं क्वापि अपकर्षे पतिताः स्मः। इतिहासस्तु पुराणानां मुख्यो विषयः। रामायणं महाभारतं च प्राधान्येन तमेवावलम्बेते। यावान् कालः इदानीन्तनस्येतिहासस्य परिचितः, ततोऽतिभूयान् प्राक्तनः काल एभिराख्यायते। खेदास्पदमिदं—यद्राजनीतिदृष्टिमवलम्ब्य पाश्चात्त्यैरविश्वासोऽस्मदितिहास आपादितः। तत्राऽविश्वासोत्पादकानि प्रमाणानि तु प्रमाणाभास इति बहुभिर्विद्वद्भिः साधितम्। प्रत्यक्षादिवच्छब्दोऽप्यस्माकं नये प्रमाणम्, प्रत्यक्षानुमान-विरोधे लौकिकः शब्दो दुर्बलो भवतीति सत्यम्, परं विरोधमदृष्ट्वैव केवलं तदुपोद्बलकं प्रत्यक्षमनुमानं वा नास्तीति—एतावता तत्परित्यागः सर्वथा प्रमाणव्यवस्थाविरुद्धः। रामो युधिष्ठिरो वा कश्चित्पुरुष विशेष आसीत्—इत्येतच्छिलालेखादिभिर्न सिद्ध्यत ति तावतैव तत्रानाश्वास इति कोऽयं पन्थाः। नासीदित्यपि तु प्रत्यक्षानुमानाभ्यां न सिद्ध्यति। प्रमाणान्तराविरोधे शब्दप्रमाणमप्रत्यूहम्, कुतस्तत्सत्तां नागमयेत्।

विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्, इति युक्तिसिद्धो भगवतो जैमिनेः पन्था अवलम्ब्यताम्। विरोधेऽपि च बलाबलं तद्रीत्या परीक्ष्यताम्, ततस्तत्त्वं प्राप्स्यते। सर्वथा शब्दप्रमाणमुपेक्षमाणास्तु रामे, युधिष्ठिरे, ईश्वरादिषु, धर्मप्रवर्त्तकेषु वा संदिहन्तीति कियत्, स्वपितर्यपि सन्देहस्तेषां दुर्वार एव प्रसज्जत इति कृतमप्रकृत-विस्तरेण।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदमपि न विस्मर्त्तव्यम्—अनेकत्रास्मच्छास्त्रप्रतिपादितविज्ञानेष्वासीद्विमतिः पाश्चात्त्यविदुषाम्, क्रमेण त्वस्मच्छास्त्राणामेव विजयस्तत्र कालेन संपाद्यते। यथास्म-दर्शन-पुराणादिप्रतिपादिते वृक्षादिचैतन्ये विप्रतिपन्ना भारतीयेनैव सुगृहीतनाम्ना जगदीशचन्द्रवसुमहोदयेन तत्प्रक्रिययैव प्रबोधिता अस्मत्सिद्धान्तं स्वीकर्त्तुं विवशा अभूवन्। पुराणोक्त-मन्वन्तर-प्रक्रियया यावान् सृष्टिकालः सिद्ध्यति, तत्र महतीं विप्रतिपत्तिमुपदर्शयन्तो विद्वांसो भूगर्भ-विज्ञान-प्रसारेण तावन्तमेवकालं सृष्टेरनुमन्यन्ते। अद्यापि तेषां कालनिश्चयो नास्ति। अन्धकारे ते स्पर्शनेन गवेषयन्ति। पुराणानि तु दिनघटीगणनामपि सृष्टेर्बोधयन्तीत्यन्यदेतत्। तथैव शब्दो नाकाशगुणः, वायुगुणोऽय-मित्यासीद्विप्रतिपत्तिः, अद्य तु क्षणादेव क्रोशसहस्रान्तरितं शब्दं दूरप्रसारक-यन्त्र-सा-हाय्येन शृण्वन्तो वायौ तावद्गतिविरहात् स्व-सिद्धान्तं पर्यवर्तरन्निति स्फुटमेवास्म-च्छास्त्र-शरणीकरणम्।

अथ न्यायविद्यास्माकं विचार्यताम्—'प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या। प्रत्यक्षागमाश्रितमनुमानम्', इतिन्यायभाष्यकृता तत्रभवता वात्स्यायनेन न्यायविद्या निरुक्ता। यदि मनागवदधीरन् विद्वांसः, तर्हि स्फुटं प्रतीयेत—सांप्रतं जायमाना नवनवा आविष्कारा न्यायविद्याविषयतां नातिक्रामन्ति। सर्वतो निरुद्धवात-प्रसरस्य अभ्रावधिश्रितस्य पात्रस्योत्पतनं दृष्ट्वा तेनैव वाष्पशक्तिमनुमाय फ्रान्सदेशीयेन केनचिद्—विदुषा धूमशकटिरियमाविष्कृतेति श्रूयते, तत्र पात्रस्योत्पतनं प्रत्यक्षम्, तदाश्रितं च वाष्पशक्तेरनुमानमिति सुस्पष्टमिदं न्याय-विद्यायामन्तर्भवति। गायन्त्या कयाचिद्वैज्ञानिक्या महिलया सूचीप्रकम्पन-जन्यांश्चिह्नविशेषान् कृष्णपट्टेऽव-लोक्य फोनोग्राफ-यन्त्रमाविष्कृतम्। किं विस्तरेण, सर्वत्र प्रत्यक्षागमाश्रितमनुमानमेवा-विष्कारजनकमिति सुमहान् न्याय-विद्या-विषयः। अद्य तु स संकोच्य केवलं वाग्विस्तर एव वन्दीकृतोऽस्माभिरिति दुर्भाग्यं देशस्य। योगदर्शनं सुदूरं मनोविज्ञान-निधानमिति मन्ये, न कस्यापि विप्रतिपत्तिरत्र भवेत्। दण्डनीत्यपरपर्याया शासननीतिः सुरभारत्यां महत्त्वास्पदमिति पाश्चात्त्यैर्विद्वद्भिरप्युररीकृतम्, काममुपेक्षन्तां तामस्मद्देशनेतारः।

मान्याः! कालातिपात-जननाद् भवदुद्वेजकाद् बिभेमि विस्तरात्। ततः सर्व-ज्ञान-विज्ञान-निधीनामस्मद्दृष्ट्या अपौरुषेयाणाम्, पाश्चात्त्य-विद्वद्दृष्ट्याऽपि संसार-पुस्तकालये सर्वतः प्रथमानां वेदानां विषये किञ्चित् संक्षेपेणैवोक्त्वा विषयमिममुप-संहरामि। विचित्रा हि वेदानां विज्ञान-निरूपण-प्रक्रिया सूत्ररूपा। ते हि देवानां स्तुतिपरैः संक्षिप्तैर्विशेषणैरेव महान्ति विज्ञानान्यवबोधयन्ति।

'अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्न-धातमम्।

इत्यग्निस्तुतिपरे चतुर्विंशत्यक्षरे मन्त्रे पुरोहितमिति विशेषणेन 'यत् किञ्चिद् दृष्टि-विषयकमग्निकमैव तद्' इति यास्कविवृतं सर्वस्यापि पुरोदृश्यमानस्याग्न्यात्मकत्व-विज्ञानम्, यज्ञस्य देवमिति सुसूक्ष्मेण विशेषणेन आदानविसर्गात्मकेन यज्ञेनाग्निरेव वनस्पत्यादीनां पशु-मृग-पक्षि-मनुष्यादि-शरीराणां च जनको वर्धकश्चेति सुमहद्विज्ञानम्, ऋत्विजमिति—ऋतूनामुत्पादकोऽग्निरेव, अग्नितारतम्येनैव ऋतुपरिवर्तनं भवतीत्ययमेव ऋतुभिर्यजति, तत एव वसन्तोऽस्मिन् समये पदार्थेष्वभयः, वस्तुमुपक्रान्ता इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वसन्त ऋतुः, गृह्णन्त इदानीं सर्वान् स्वव्याप्ताविति' ग्रीष्मऋतुः, अतिवृद्धा इदानीमिति वर्षा एव वर्षाः, इदानीन्तु ह्रसितुमुपक्रान्ताः शीर्यन्त इति शरदः, हीना इदानीमिति हेमन्तः, अतिशयेन शीर्णा इति शिशिर इत्यग्नि विशेषणान्येव बहुवचनान्तानि ऋतु-नाम्ना प्रयुज्यन्ते। किमन्यद्, जूनिर्ज्यूलिर्वा व्यक्तिविशेषो यस्मिन्मासे जनिं लेभे, तन्नाम्ना जून-जुलाईत्यादिमासा यत्र वैज्ञानिक्यां शिरोमणिभूतायां 'भाषायामाख्यायन्ते, तत्र मधुः, माधवः, शुचिः, शुक्रः, नभाः, नभस्यः, इषः, ऊर्जः, सहः, सहस्यः, तपाः, तपस्यः—इति तत्तत्तत्त्वप्रदवैज्ञानिकनाम्ना मासा अस्माकं वेदेष्वाख्यायन्ते। ततोप्यधिका वयमवैज्ञानिकाः, अन्ये तु विज्ञानपारंगता इति भाग्य-माहात्म्यमेतत्। आस्ताम्, रत्नधातममिति विशेषणेन च सुवर्णमौक्तिकादीनां रत्नानामुत्पादकः पोषकश्चाग्निरेवेति विज्ञानं सुस्पष्टमावेद्यते। तथैव 'इषेत्वोर्जेत्वा वायवः स्थ', 'देवोवः सविता प्रार्पयतु', इति वायवीये मन्त्रेऽस्मच्छरीरेषु इट्चोर्ज्चेत्याद्या वायुनैवोत्पाद्यन्ते, वायोश्च गतिः सूर्यकिरणाघातादिति विशेषणैरेव महद्विज्ञानं सूचितम्, 'सवितृ-प्रसूत' एष पवते' इत्यादिना ब्राह्मणग्रन्थेषु च स्फुटीकृतम्। एवम् **आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च, हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्'** इति सूर्यस्तुतिपरे मन्त्रे सूर्यमण्डलस्य कृष्णवर्णता, रथपदवाच्यकिरणजालस्य तदाघातेन व्यापकस्य सोमस्य प्रज्वलनाद्धिरण्मयत्वम्, तत्कृत एवायं प्रकाशः, सूर्याकर्षणेनैव पृथिव्यादि-लोकानां मर्त्यानाम्, बृहस्पतिवरुणादीनामूर्ध्वस्थितानाममृतानां चावस्थिति-रिति सर्वं स्पष्टमावेदितम्। इत्थं संक्षिप्ताक्षरैः सूत्ररूपैः पदैः सर्वं वस्तुतत्त्वज्ञानं प्रकटयति भगवती श्रुतिरिति नास्मिन् लघुनिबन्धेऽधिकं वक्तुं पार्यते; बहुत्र तु स्फुटमेव विज्ञानानि स्पष्टैरक्षरैरुपदिश्यन्ते, यानि न केनाप्यपलपितुं शक्यन्ते। **"मनो देवा मनुष्यस्याजानन्ति, इति, मनसा संकल्पयति तत्प्राणमभिपद्यते, प्राणोवातम्, वातो-देवेभ्य आचष्टे यथा पुरुषस्य मनः। तस्मादेतदृषिणाभ्यनूक्तम्, मनसा संकल्पयति तद्वातमपि गच्छति, वातो देवेभ्य आचष्टे यथा पुरुष ते मनः"**

(शतपथ, काण्डः ३, अध्यायः ४; ब्रा० २)

इति आथर्वणश्रुतिमन्त्रम्, (१२।४।४।) उद्धरता शतपथब्राह्मणेन पुरुषमभितः स्थितं वातमण्डलं परोक्ष्य, तन्मनोभावानां ज्ञानं सुस्पष्टैरक्षरैरुद्घोषितम्, यदिदानीं मनो-वैज्ञानिकैराविष्कृत्यानुशील्यते।

अनवर्णे इमे भूमी इयञ्चासौ च रोदसी।
किंस्विदत्रान्तराभूतं येनेमे विधृते उभे,
विष्णुना विधृते भूमी इति वत्सस्य वेदना।
इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या।
व्यस्तम्नाद्रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः"

इति (ऋ० म० ७।९९।३)

ऋचं प्रमाणयता तैत्तिरीयारण्यकेन (१।८।४।६) विष्णुपद-वाच्यस्यादित्यस्या-कर्षणे भूम्यादिकं स्थितमिति विज्ञानं स्पष्टाक्षरैरेव प्रश्नोत्तरपूर्वकं विनिर्दिश्यते। दिव्यात्र-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मेतत्, वेदपरिशीलनेन वस्तु-विज्ञानान्यतिमहान्ति तत्र तत्र स्फुटीभवन्ति। इयं तु वेदानां वैज्ञानिकी दृष्टिर्बौद्धकाले विलुप्ता, सुगृहीतनामधेयैस्तैस्तैराचार्यैरार्यसंस्कृतिमूलभूता वेदश्रद्धा तु जनतायां रक्षिता, परं तदात्वे वैज्ञानिकयुगाभावाद्वैज्ञानिकार्थप्रचारो जनतासु नैवाजायत। वाद-प्रधानशास्त्रान्तरप्रवृत्तिः, 'छान्दसाः श्लोकशत्रवः' इति कवीनां सुरसा आलापाश्चापि तत्र प्रतिबन्धका बभूवुः। अस्यां वैज्ञानिक्यां शताब्द्यां श्रीमद्दयानन्दस्वामि-श्रीसत्यव्रत-सामश्रमिप्रभृतिभिर्महानुभावैरत्र दृष्टिनिक्षेपः कृतः। अस्मद्गुरुचरणैर्विद्यावाचस्पति-श्रीमधुसूदन-झामहाभागैस्तु आजन्म परिश्रम्य तथायं वेदवैज्ञानिकपथः परिष्कृत्य राजमार्गतां नीतो यथा तमनुगच्छन्त आधुनिका वैज्ञानिका अपि ततो बहुतरं शिक्षितुं शक्नुयुः, वेद-विज्ञानस्याधमर्णाश्च तद् भवेयुरिति। प्रिया महाभागाः! एषा सर्वविध-विद्याकला-समृद्धापि सुरभारती पठनपाठन-प्रणाली-दोषेण तथाल्पपरिच्छदाऽस्माभिरापादिता, यथा कोणे निलीनेव कथंचिज्जीवनं यापयति। एतां शिक्षमाणाश्च न शिक्षितेषु परिगण्यन्ते। व्याकरणम्, अवच्छेदकताप्रधानो नव्यन्यायः, काव्यकला-शिक्षकं च साहित्यम्, इति केवलं वागाडम्बरप्रधानान्यर्थ-परीक्षा-पराङ्मुखानि कतिचिच्छास्त्राणि अधीत्याद्य महत्पाण्डित्यमासाद्यते। न तैर्लौकिक उपयोगः कश्चित् सिध्यति, न वा पारलौकिकः। अनुपयोगाद्बहवो विद्याकला-ग्रन्था विनष्टाश्च, विनश्यन्ति च, दूरे त्वभिनवव्याख्योत्पादनकथा। प्रायेण त्रिंशतोऽब्देभ्योऽहमेतदाक्रन्दने प्रवृत्तः 'विशोध्यतामियं निष्फला पाठन-पद्धतिरिति, संस्कृतसाहित्य-संमेलनादिकं द्वारीकृत्य बहुत्र यथाशक्ति प्रयतितम्, परं मान्यानां विदुषां दृष्टिमाकृष्टुं नैव प्राभवम्। इदानीं तु कालप्रभावाद्विद्वांसोऽप्यत्रावदधति। जायते च तत्र तत्र पाठ्यक्रम-संशोधनान्दोलनम्, परमद्यापि बहवः संस्कृत-प्रणयिनो विद्वांसो बिभ्यति, अध्ययनेविषयान्तर-संस्पर्शेन तत्तच्छास्त्रस्य प्रौढिर्विलुप्ता स्यादिति। केयं पारिभाषिकी प्रौढिः, या विषयान्तर-स्पर्शादेव लज्जावती लतेव म्लायत-इति तां न जानीमः। किं तत्रभवान् विष्णुगुप्तश्चाणक्यः प्रौढः पण्डितो नासीद्, यो राजनीतिनिष्णातो भारत-शासनधुरमुवाह। सर्वतन्त्र-निबन्धकारः श्रीसायणमाधवोऽपि किं न प्रौढः पण्डितो योऽमात्य आसीद्बुक्क-महीपतेः। अस्यामेव शताब्द्यां श्रीभागवतव्याख्याकृतः श्रीगङ्गासहायपण्डिताः किं प्रौढा नासन्, यैर्बून्दीराजस्य मन्त्रिपदं बहुकालं निर्व्यूढम्। एते सर्वेऽपि यदि न प्रौढाः, तर्हि सा प्रौढिर्दूरत एव नमस्कार्या। किं वा प्रौढ्या तया साध्यते? अद्य हिन्दू-सभ्यतायाम्, वैदिके धर्मे, आर्यदर्शनेषु च जायन्ते प्रत्यहं प्रबलाः प्रहाराः, किं प्रौढाः पण्डिताः किमपि प्रतिक्षिपन्ति? न यया धर्मो रक्ष्यते, नोदरपूरणायाप्यन्नं लभ्यते सा धर्मार्थकाममोक्षेषु कमपि पुरुषार्थमसाधयन्ती चेत् प्रौढिः तर्हि का नामाप्रौढिर्भवतु। तस्मात् प्रियाः स्नातकाः! इदमिदानीं मुख्यं कर्त्तव्यं तत्रभवताम्-यदध्ययन-पद्धति-दुर्व्यवस्थया सीदन्तीयं सर्वविद्याकलाजननी माता नः सुरभारती परिष्कार्याध्ययनपद्धतिं, कृच्छ्रादुन्मोच्या। यद्यद् विज्ञानं पाश्चात्त्यैरत्युन्नतिं प्रापितम्, तस्य तस्य ते तेंऽशा भारतीयया प्रक्रियया सुरभारत्यां संग्राह्याः। सुरभारत्यामन्तर्निगूढानि च विज्ञानान्याधुनिक्या प्रक्रियया जगतः पुरो निधातव्यानि। केवलं शब्दप्रवणतां परित्यज्यार्थपरीक्षा-प्रवणता यथा शिक्षायां सम्पद्येत तथा प्रयतनीयम्। शिक्षा हि शक्तिसमर्पिका, मूलतः शकधातोरेव शिक्षापदं निष्पादयन्ति नैरुक्ता वैयाकरणाश्च। तत्सर्वविधशक्तिसंपादनं यथा स्यात्, तथा शिक्षा प्रवर्तनीया। इदानीं भारतं स्वतन्त्रमिति सुकरमस्माकं सर्वम्। अन्वेषण विभागोऽद्य महाविद्यालयेऽस्मिन्नुद्घाटितः, तदर्थं वयं सर्वे कृतज्ञाः स्मः शिक्षामन्त्रिमहोदयस्य। इदं कार्यक्षेत्रे-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मंशतो विस्तीर्णं जातं युष्माकम्। अस्य विद्यालयस्याध्यक्ष (प्रिंसिपल) महोदयः संस्कृतस्योन्नतये प्राणपणेन विचेष्टते। सर्वापीयमुन्नतिरस्य महाशयस्य परिश्रमफलम्। इदमपि मनसि करणीयम्, इङ्गलिशज्ञा एव तानि तानि पदान्यर्हन्तीति नेदानीमावश्यकम्। तद्वद्भिरपि शिक्षायां ज्ञातुमावश्यकास्तेते विषया गणित-भूगोलेतिहास-संपत्तिशास्त्रादयस्तथा संगृह्यन्ताम्—यथा संस्कृत-विद्वांसोऽपि सर्वेषु राजकीयेषु प्रजासंबन्धिषु च व्यवहार-विभागेषु प्रवेष्टुमर्हाः स्युः। ततएव वृत्तिसौकर्येसंस्कृतस्योन्नतिः संभाव्यते, तदैव च संस्कृतस्य राष्ट्रभाषात्व-संपादनपथोऽपि परिष्कृतः स्यात्।

सर्वतः प्रधानं च तत्रभवतां कर्त्तव्यं हिन्दू-संस्कृति-संरक्षणम्। भवन्त एव ननु हिन्दूसंस्कृतेः सनातनस्य धर्मस्य च सैनिकाः। तस्या रक्षणार्थमेव संस्कृत-शिक्षाया इदानीं महत्यावश्यकता। तत्कालप्रवाहाद् बिभ्यतो भवन्तोऽपि यदि प्राचीनां संस्कृतिं रक्षितुं शिथिला भवेयुः, भवन्तोऽपि यदि शास्त्रोक्तं पन्थानं तिरस्कृत्येतस्ततः प्रचलेयुः, तर्हि "नावं निमज्जयितुमिच्छति कर्णधारे, हा हन्त! कं प्रति कथं किमु वा वदामः" इत्येव परिस्थितिरुपस्थिता स्यात्। इदं सोत्साहं सततं च मनसि धार्यम्-यत्तृणानि एव प्रवाहे प्रवहन्ति, शैलास्तु प्रवाहमेव परिवर्तयन्ति। श्रीशङ्कराचार्यपादाः श्रीरामानुजाचार्यादयोमहानुभावाश्च यदि प्रवाहमेवान्ववर्त्स्यन्; न तर्हि सनातनस्य धर्मस्य कथापीदानीमश्रोष्यत। न च तेषां नामाद्य सादरं सर्वेषां जिह्वासु व्यराजिष्यत। तस्मात्प्राणपणेन रक्षणीयास्माकं संस्कृतिः।

अधिकारिमहाभागानपि किञ्चिन्निवेद्य वक्तव्यमुपसंहरामि, इदानीं स्वतन्त्रे भारते भारतस्य प्राचीनतमायाः सर्वभाषाजनन्याः सुरभारत्याः संरक्षणं श्रीमतां प्रधानं कर्त्तव्यं भवितुमर्हति। यां राष्ट्रभाषापदेऽभिषेक्तुं सन्नद्धा भवन्तः, भाव्यमेव चावश्यं सन्नद्धैः, सा हिन्दीभाषा संस्कृतं विना अद्याप्यपूर्णैव। संस्कृत-मूलकमेव तस्याः सर्वस्वम्। इदमपि चावधेयम्—संस्कृतभाषायाः प्रसारेणैव, शिक्षायामस्याः प्राधान्य-प्रतिष्ठापनेनैव च शान्तिलोके प्रतिष्ठापयितुं शक्यते श्रीमद्भिः, या सर्वेषामभिवाञ्छिता। भ्रष्टाचाराश्च तदैव समुत्सारिताः स्युः।

आपदां कथितः पन्था इन्द्रियाणामसंयमः।
तज्जयः संपदां मार्गो येनेष्टं तेन गम्यताम्॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥
सर्वे कुशलिनः सन्तु सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु न कश्चिद्दुःखभाग् भवेत्॥

इत्याद्याः प्रतिपदमुपदेशाः सुरभारत्यामेव लभ्यन्ते, ईश्वराभिमुख्यं च यत्सर्वशान्तिमूलं तत्संस्कृतभाषैव प्रतिपदं शिक्षयति। तस्मात्संस्कृत-शिक्षायाः प्रसारे श्रीमतामत्युचितोऽत्यावश्यकश्च दृष्टि-निक्षेपः, शिक्षा-पद्धतिं तूर्णं परिशोध्य सर्वविभाग-प्रवेशः श्रीमद्भिः संस्कृतज्ञानामनुमन्तव्यः। कस्मिंश्चिदपि विभागे संस्कृतज्ञा अल्पं वेतनं लभेरन् आङ्गलादिभाषाभिज्ञाश्च प्रभूतमिति सर्वथाऽन्याय्यं वैषम्यमिदं तूर्णमेव दूरे समुत्सार्यम्। तेन सोत्साहं संस्कृताध्ययन-प्रवृत्तौ भारतं याथार्थ्येन भारतं स्यादिति पूरयतु जगदीश्वरो मनोरथमिममिति शम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुद्रक—

श्रीरामेश्वर पाठक,
तारा यन्त्रालय, काशी।

Kirtikant Sharma Collection, Najafgarh